Digitized by eGangotri

सर्वसिद्धान्तविवेक:
SARVA SIDDHĀNTA VIVĒKA

Dr. R. Nagaswamy

••स्कैन्ड/ Scanned••

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

S-2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

1. मन्त्रवादः

अथातो मन्त्रवादश्च सङ्ग्रहेण निगद्यते।
मन्त्रोपासनया मुक्तिः सह प्रागुक्तवर्त्मना।। 1
नमः स्वाहा स्वधा वौषट् बषड्ढुंफडिव्भेदतः।
सप्तकोटिमहामन्त्राः सर्वकृत्यविधायिनः।। 2
साक्षाच्छक्तिस्वरूपास्ते नत्वन्येच तथा वचः।
मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहः।। 3
मननत्राणसंयोगात् मन्त्र इत्यभिधीयते। 4
इत्यतोऽपि स्फुटं तस्मात् मन्त्रज्ञानपुरः सरम्।
मन्त्रोपासनया मुक्तिर्मन्त्रवादे निरूपिता।। 5

2. यन्त्रवादः

अथातो यन्त्रवादे तु वामतन्त्रोक्तवर्त्मना।
तद्यन्त्रसेवया सर्वं सिध्यतीति विनिश्चयः।। 6
सर्वत्रापि विना यन्त्रं मन्त्रभेदेन किं फलम्।
तन्त्रभेदेन वा तस्मात्सर्वं यन्त्रेण सिद्धयति।। 7
अणिमा महिमा चैव गरिमा लघिमा तथा।
ईशत्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च।। 8
ततोऽन्ये सिद्धिभेदाश्च कथ्यन्ते कर्षणं पुनः।
मोहनं च तथा चोच्चाटनं स्तम्भनमेव च।। 9
मारणं च तथा विद्वेषणं भेदनमित्यपि।
लोकान्तरेषु भोगश्च मुक्तिश्चेति विनिश्चयात्।। 10
साक्षाच्छक्तिस्वरूपं तद्यन्त्रमेवात्र सेव्यते।
तदङ्गत्वेन मन्त्रादि सेवातुल्यं च सम्मतम्।। 11

3. औषधवादः

अथात्रौषधवादे तु सर्वमौषधसेवया।
साध्यमेवेति सिद्धान्तः तद्धि शक्तयात्मकं मतम्।। 12

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ततस्तत्तन्त्रसंसिद्धकायकल्पादि सेवया।
मण्डलाद्युक्तकालेन जननादिश्च नश्यति ।। 13
देहकान्तिर्महत्वं च देहस्य नियतं भवेत्।
आकाशगमनादिश्च सिद्धिर्मुक्तिश्च सिद्ध्यति ।। 14
किं फलं मन्त्रयन्त्रादि सेवयेति विनिश्चितः। 15

4. कर्मसिद्धान्तः

अथातः कर्मसिद्धान्ते सर्वं कर्मवशादिति।
औषधेन तथा यन्त्रमन्त्रजातैश्च किं फलम् ।। 16
जातं क्षयं सुखं क्लेशं वार्धकं मरणं तथा।
एवमुक्तं तु षट्कं च गतसंकल्पनिश्चयम् ।। 17

जन्मारोग्यं श्रुतं श्रीजनितमथ यशो बन्धुदाराश्च पुत्राः
भृत्याः क्षेत्रं गृहाः स्युर्वितरणमपि गीर्देहकान्तिर्महत्वम्।
प्रीतिर्मित्रं सखायः शुभमपि च विपत्कालमृत्युर्नराणां
पूर्वाभ्यासानुरूपं विधिविहितवशादेति कालं प्रपद्ये ।। 18

इत्यतो हि नवीनैः किं स्वप्रयत्नैस्तथाविधैः।
अत एव तथा लोके शास्त्रेष्वपि च विश्रुतम् ।। 19
भवितव्यं भवत्येव नालिकेरफलाम्बुवत्।
गन्तव्यं गच्छति सदा गजभुक्तकपित्थवत् ।। 20

कुब्जं च काणं विकलं च पङ्गुं मूकं च मूर्खं मतिविभ्रमं वा।
देवानुकूलेन वृणोति सम्पन्न पौरुषं कुत्रचिदस्ति कान्ते ।। 21
इदं मया प्राप्तमिदं प्रपत्स्ये इदं करोमीति वृथा जनोऽयम्।
वदन्त्यहोऽज्ञानवशोऽनवद्ये न पौरुषं कुत्रचिदस्ति कृत्ये ।। 22
सपुत्रदारः सपशुर्धनाढ्यः सामर्थ्यतोऽस्मीत्यवपद्यते यः।
स विप्रकर्षे किमुपैति शोकं द्विपात्पशुर्ज्ञानबहिष्कृतश्च ।। 23

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इति सञ्चिन्त्य कर्मानुसारिणी बुद्धिरित्यतः ।
न्यायादेव यथा बुद्धिर्यत एव प्रवर्तते ।। 24
तथा तत्र प्रवृत्तः सन्नान्यथा कुत्रचित्स्वयम् ।
सुखदुःखादिविषये नालसो मुक्तिभाग्भवेत् ।। 25
इत्येवं कर्मवादश्च कथितः सङ्ग्रहेण तु । 26A

5. अद्वैतवामसिद्धान्तः

अद्वैतवामपक्षे तु सर्वं शक्तिविवर्तकम् ।
तथा शक्तिविवर्तेन विना किञ्चिचन्न दृश्यते ।। 27
कर्म माया च लोकश्च तथा जीवेश्वरौ शिवः ।
पशु पाशादि सर्वं च विना शक्त्या नहि स्फुटम् ।। 28
इतिविज्ञानमात्रेण मुक्त एव भवेन्नरः ।
ब्रह्महा मद्यपः स्तेयी त्वगम्यागमनोऽपि सः ।। 29
कुतो वा कर्मणा मुक्तिस्तथैव श्रूयते वचः ।
ज्ञानादेव हिकैवल्यं नान्यथा कर्मकोटिभिः ।। 30
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
इत्यादि वचनं सर्वं अज्ञानि विषयं मतम् ।। 31
एवमद्वैतसिद्धान्तो वामभेदे निरुपितः । 32A

6. द्वैतवामसिद्धान्तः

द्वैतवामागमे सिद्धः पदार्थस्त्रिविधो मतः ।
शक्तिः पशुश्च पाशश्च नत्वेका शक्तिरित्यथ ।। 33
आत्मा च शक्तिवत्साध्यस्ततः सर्वज्ञतादिमान् ।
अनादौ मलसम्बन्धात्तज्ज्ञानादि न राजते ।। 34
तथा ज्ञानादिसंसिद्धौ शक्तिदीक्षापुरस्सरम् ।
गुरोरेव मुखात्प्राप्ततन्त्रज्ञानपरायण ः ।। 35
चर्यया वाऽथ योगेन पूजादिक्रियया पुनः ।
उपास्त्या शक्तिभेदानां साक्षाच्छक्तेरतोऽथवा ।। 36

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मुक्त एव भवेन्नायं केवलेन तु कर्मणा।
विज्ञानेन च मुक्तात्मा शक्त्या च भ्राजते सदा ॥ 37
मुक्तौ सुनिर्मलः सर्वज्ञता धर्मादिसंयुतः।
इत्येवं द्वैतवामाख्ये सिद्धान्तश्च निरूपितः ॥ 38

7. मिश्रवामवादः

अथातो मिश्रवामे तु पृथक्त्वेपि परस्परम्।
त्रयाणां च पदार्थानां व्याप्त्या तस्याश्च शक्तितः ॥ 39
सर्वेषां मिश्रसिद्धान्ते सर्वं शक्तिमयं स्मृतम्।
शिवश्च तस्य देहश्च ज्ञानावरणमेव च ॥ 40
तथात्मा तस्य देहादि तदेवं भुवनानि च।
शक्तिरूपमिति ज्ञात्वा शाक्ततन्त्रोक्तवर्त्मना ॥ 41
साध्या च मधुमांसादिसंपादन पुरस्सरम्।
पूजया होमतो वाथ जपेन ध्यानतः पुनः ॥ 42
शक्त्युपासनया मुक्तिः मुक्तः शक्त्यात्मको भवेत्।
न शक्तेर्भिन्न एवायं शक्त्या मिश्रो यतः पुनः ॥ 43
न समश्च भवेच्छक्त्या तथानेकेशवादतः।
इत्येवं मिश्रवामे तु तदर्थोऽपि निरूपितः ॥ 44

8. वामसिद्धान्तः

अथातो वामसिद्धान्तः संग्रहेण निरूप्यते।
वामाद्यष्टागमप्रोक्तमङ्गीकृत्य यथोचितम् ॥ 45
प्रत्यक्षादीनि मानानि प्रागुक्तान्येव तानि वै।
शक्तिश्च पशुपाशौ च पदार्थस्त्रिविधो मतः ॥ 46
अनन्या शक्तिरन्येषां सर्वेषां व्याप्तितो मता।
वामादिषु च सर्वेषु कृतकृत्योऽत्र साधकः ॥ 47
तीव्रतीव्रतरत्वेन शक्तिपातेन संयुतः।
शाम्भवी दीक्षया मुक्तः सदुपायबलेन च ॥ 48

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सदुपायस्तु सन्मार्गज्ञानयोगादिकः स्मृतः ।
आधाराद्या बहुविधा सा ह्यनुग्रहरूपिणि ॥ 49
ध्येयाऽऽदित्यादिवद्ध्यानात् सा शक्तिः पारमेश्वरी ।
इत्येवं वामसिद्धान्तः संग्रहेण समीरितः ॥ 50

9. शक्तिपरिणामसिद्धान्तः

आदितो वामपक्षे तु तत्सिद्धान्तो निरुप्यते ।
शाक्तं सामान्यतः प्रोक्तमङ्गीकृत्य यथोचितम् ॥ 51
शक्तिरेव जगत्कर्त्री सा पुनः स्यात्सहस्रशः ।
समारभ्य पराशक्ते : क्रियाशक्त्यन्तभेदतः ॥ 52
तद्रूपपरिणामेन जगत्सर्वं चराचरम् ।
मन्त्रेश्वरादयः सर्वे ततोऽन्ये जीवकोटयः ॥ 53
वष्कादिशब्दभेदश्च तत्वाद्यर्थभिदा पुनः ।
ज्ञेयभेदाश्च ज्ञानं च ज्ञापकश्च ततोन्यथा ॥ 54
यदस्ति सर्वं तच्छक्तिमूर्त्तिरूपं तथा जगत् ।
शिवरूपं च सा शक्तिर्बहुनोक्तेन किं पुनः ॥ 55
एवं विज्ञानवान् मूलनवसिद्धान्त (यामलागम) वर्त्मगः ॥ 56.A
वैष्णवादिषु बाह्येषु शैवभेदेषु वा पुनः ।
भैरवादिषु भेदेषु कृतकृत्यः पुरा नरः ॥ 57
कर्मसाम्यादिसंसिद्धशक्तिपातविशेषतः ।
वामतन्त्रोक्तमार्गेण सद्गुरोर्लब्धदीक्षया ॥ 58
चर्यादीनमनुज्ञानात् साधको मुक्तिभाग्भवेत् ।
इत्येवं वामसिद्धान्तः कथितः सङ्ग्रहादिह ॥ 59

9. शैवभेदाः

लोकायतोऽथ बौद्धश्चार्हतो मीमांस एव च ।
मायावादः पाञ्चरात्रं षडेते समया बहिः ॥ 60
शैवं पाशुपतं वामं भैरवं तु महाव्रतम् ।
कालामुखमिति ख्यातमन्तःसमय षट्ककम् ॥ 61

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शैवभेदं प्रवक्ष्यामि ऐक्यपाषाणवादिनौ ।
भेदवादी समवादी सङ्क्रान्ती चाविकारवान् ।। 62
परिणामी च शैवश्च सिद्धान्ती पर ईरितः । 63A

10. कौलमतम्

भैरवस्यापि भेदोऽस्ति यदेवंश्रूयते श्रुतौ ।
चतुर्विधं दक्षिणं स्यादिति सौम्ये शिवागमे ।। 64
तेषु कौलस्तु मत्स्येन्द्रनाथसिद्धादिभिः स्फुटम् ।
प्रवर्त्तितो न सौम्ये तु मृगेन्द्रे कथितो मतः ।। 65
शैवं मन्त्रश्वरं गौणं दिव्यमार्ष गण ह्यकम् ।
योगिनी सिद्धके... होता.... स्यष्टौ विदुर्बुधाः ।। 66
तथा मत्स्येन्द्रसिद्धादिमतोऽत्र कौलकः स्मृतः ।
तत्रार्थाः पञ्चभूतोत्थशरीर भुवनादयः ।। 67
ज्ञानकर्मेन्द्रियाण्येव दशधा विषया अपि ।
पाशास्ते पशवो बद्धा देवादि स्थावरान्तकाः ।। 68
.... स्तु भैरव.... स्तदुपास्त्या परा....।
चर्यया क्रियया वापि मधुमांसादि सेवया ।। 69
योगतो वा त .... ततः ।
अतिप्रख्यातिमायाति सर्वलोकैश्च पूजिताः ।
पश्चाद्भैरवदेवस्य पदं प्राप्य विमुच्यते ।। 70
पाशाद्याधिपतेरस्य सर्वेषां जगतां प्रभोः ।
अत्र सिद्धिंगताः सिद्धाः सर्वे ते नाथ संज्ञिताः ।। 71
गोरक्षनाथप्रख्या ये योगशास्त्रप्रवर्त्तकाः ।
आदिनाथो विरूपाक्षो मत्स्येन्द्रो परिघस्तथा ।। 72
नागार्जुनो मेघनाथश्चारङ्गी योगशास्त्रवित् ।
गोरक्षसिद्धबुद्धश्च न च ते सिद्धयोगिनः ।। 73
शापानुग्रहकर्तारो निराशा भिक्षुकाः सदा ।
इष्टदाः सेवया पुंसां सिंहनादादिचिन्हिताः ।। 74
इत्येवं सङ्ग्रहेणात्र कौलपक्षो निरूपितः । 75A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

11. गारुड-दक्षिण-वाम-भूततन्त्राः

दृष्टादृष्टार्थसंसिद्धशास्त्रेषु कामिकादिषु।
लोकविश्वासहेतोस्तद् दृष्टार्थप्रतिपादनम् ।। 76
गारुडं दक्षिणं वामं भूततन्त्रं तथैव च।
चतुर्विधानि शास्त्राणि पुरुषाद्युदितानि च ।। 77
अधः स्रोतांसि शैवानि मूर्तिभिः पुरुषादिभिः।
विज्ञानकेवलैरद्रैः प्रेर्यैस्तत्पुरुषादिभिः ।। 78
प्रवर्तितानि तान्येवं कामिकाद्यनुसारतः।
अस्वतन्त्रतयोक्तानि तेषु गारुड उच्यते ।। 79
पुरुषब्रह्मरूपोयं पूजनीयो जगत्पतिः।
तदुपासनया सिद्ध प्र.... च्यते ।। 80
यन्मन्त्रौषधसंसिद्धं चिकित्साजातमुत्तमम्। 81A

12. कालामुखम्

अथ कालामुखार्थस्तु सङ्ग्रहेण निगद्यते।
स्फाटिकं कुण्डलं चैव रक्तचन्दनलेपनम् ।। 82
पुत्रदीप... कालामुखस्तथा।
इति लक्षणसंयुक्तः सेव्यः कालामुखो मतः ।। 83
व्रतं कालामुखं प्रोक्तम्....।
प्रत्यक्षादीनि मानानि तत्र प्रागुक्तवर्त्मना ।। 84
पतिः पशुश्च पाशश्च प्रमेयस्त्रिविधो मतः।
पतिः साक्षान्महादेवो रुद्र एव न भैरवः ।। 85
रुद्रांशेन विना तस्य न पृथक्त्वेन सम्भवः।
तस्मादेवं महादेवो रुद्रोऽयं मूलविग्रहः ।। 86
स एव दक्षिणामूर्तिरूपादिबहुविग्रहः।
साक्षात्सदाशिवो नित्यः शिव एव जगत्पतिः ।। 87
तद्भेदो बहुधा प्रोक्तस्तत्तत्कृत्यानुसारतः।
पशुस्तु त्रिविधो ज्ञेयः प्रागुक्तेनैव वर्त्मना ।। 88

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पाशं च मलमायादि मायेयं स्याज्जगद् ध्रुवम्।
पाशबन्धनिवृत्यर्थं पशुभिः सेव्यते शिवः ॥ 89
अष्टम्यां च चतुर्दश्यां शिवरात्रिव्रतेन च।
सोमवारादिभिर्नित्यमन्यथोपायतः पुनः ॥ 90
व्रतं कालामुखं प्रोक्तं शिवदीक्षापुरःसरम्।
शक्तिपातानुसारेण कर्मसाम्येऽपि सम्भवे ॥ 91
तथानुष्ठानसामर्थ्यादात्मा शुद्धो भवेत्तदा।
आत्मा नक्षत्रवद्भाति शिवस्त्वर्क इव स्फुटम् ॥ 92
तदात्मशिवसंयोगः परमोक्ष इति समृतः।
इत्येवं सङ्ग्रहादुक्तो व्रतं कालामुखो मतः ॥ 93

13. कापालम्

अथ कापालसिद्धान्तः कथ्यते संग्रहादिह।
तत्कालामुखसंप्रोक्तमङ्गीकृत्य यथोचितम् ॥ 94
कापालशैवतन्त्रं तु सेव्यते यत्कपालिभिः।
महाश्मशाने संहारे नृत्यमानमहेशवत् ॥ 95
स्वात्मानं ध्यायमानः सन् सामगानपुरःसरम्।
नरकपालहस्तस्तु स भिक्षामटते ततः ॥ 96
कापालीति हि संप्रोक्तः कापाले साधकोत्तमः।
कथं प्रागुक्तशैवस्य कालामुखमतस्य च ॥ 97
एकदेशमतत्वेन केचिदिच्छन्ति पण्डिताः।
पञ्चार्थं च पुराकल्पं शिवगुहचप्रमाणकम् ॥ 98
व्यूहमादर्शनं चैव पद्माकरकशैलकम्।
नृत्तं चैव सुदुष्प्रापं सिद्धार्थं हि चतुर्दश ॥ 99
कापालमेवमाख्यातं लाकुलं श्रृणु चानघ।
इति दीप्तेन तत्तन्त्राण्युक्तान्यर्थैस्त्रिधा मतः ॥ 100
पतिः पशुश्च पाशश्च तत्र रुद्रो जगत्पतिः।
महाश्मशाने संहारे नृत्यमानो महेश्वरः ॥ 101

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सदाशिव इति ज्ञेयः सर्ववित्सर्वकृत्प्रभुः ।
आत्मानो बहवो बद्धा ज्ञानमात्रस्वरूपिणः ।। 102
ज्ञानक्रियास्वरूपस्तु शिव एको न चापरः ।
कर्म माया च पाशः स्यादाकाशं तत्वमुच्यते ।। 103
काल एवात्र माया च तयोर्भेदो न विद्यते ।
तेन बन्धनिवृत्त्यर्थं शिवदीक्षापुरःसरम् ।। 104
कुर्वन्नित्यादिकं कर्म कापालज्ञानपारगः ।
अतिवैराग्यसंपन्नः स्तुतिनिन्दापराङ्मुखः ।। 105
तथा भिक्षान्नभोक्तायं प्रागुक्तेनैव वर्त्मना ।
मुक्त एव भवेत्तत्र मुक्तौ शिवसमः पुमान् ।। 106
न तु नक्षत्रवज्जीवो भानुवद्राजते यतः ।
मुक्तो शिवगुणावेशाद्विभेदो जायते किल ।। 107
सर्वज्ञतादिधर्मो हि मुक्तय शिववत्पुनः ।
इत्येवं संग्रहादेव कापालः कतितो मतः ।। 108

14. महाव्रतम्

अथ महाव्रतः शैवः कथ्यते लेशत स्फुटम् ।
कापालागमसंप्रोक्तमङ्गीकृत्य यथोचितम् ।। 109
कुण्डिका कुण्डलं चैव उरगश्च शिखामणिः ।
केशयज्ञोपवीतं च पञ्च मुद्रा महाव्रते ।। 110
इति लक्षणसंयुक्तः उच्यते स महाव्रतः ।
प्रत्यक्षादीनि मानानि प्रागुक्तान्येव तानि वै ।। 111
तथा मानेषु सर्वेषु श्रेष्ठो महाव्रतः स्मृतः ।
पतिः पशुश्च पाशश्च तदर्थः त्रिविधो मतः ।। 112
पतिःसदाशिवो ज्ञेयः सर्ववित्सर्वकृद्विभुः ।
अनादिर्निर्मिलो रुद्रः सर्वकारणकारणः ।। 113
आत्मानो बहवो ज्ञेया ज्ञानमात्रस्वरूपिणः ।
पत्युरेव क्रियाशक्तिर्नान्येषामात्मनामिह ।। 114

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पाशस्तु कर्म माया च नत्वाणवमलः स्मृतः ।
शक्तिपाते तु तत्तन्त्रशिवदीक्षापुरःसरम् ।। 115
ज्ञानचर्याद्यनुष्ठानान्मुक्तो भवति मानवः ।
लिङ्गधारी सदा स्वस्य मस्तके कन्धरेऽथवा ।। 116
नाभेरूर्ध्वं यथाशास्त्रं स्थानेषु हृदयादिषु ।
लिङ्गस्य धारणान्मुक्तिः किं पुनः पूजया नृणाम् ।। 117
यथा शिवे तथा भक्तिः गुरौ वै जङ्गमेषु च ।
तथापि जङ्गमे भक्तिर्विशेष इति कथ्यते ।। 118
महाव्रताख्यशास्त्रोक्तनित्यकर्मादितत्पराः ।
एकेन जन्मना मुक्तिं प्रयान्तीह महाव्रताः ।। 119
इति महाव्रतः सोऽयं संग्रहेण प्रदर्शितः । 120A

15. पाशुपतम्–गुणसंक्रान्तम्

अथ पाशुपतं वक्ष्ये गुणसंक्रान्तवादिनाम् ।
भस्म मेध्यं चोत्तरीयं विष्टरं पुस्तकं तथा ।। 121
मेखलोपरि कौपीनमेवं पाशुपतं स्मृतम् ।
इति लक्षणसंयुक्तैः सेव्यते यो नरोत्तमैः ।। 122
प्रत्यक्षादीनि मानानि प्रागुक्तानीह तानि वै ।
तत्र पाशुपतः श्रेष्ठः आगमस्तु सदोच्यते ।। 123
प्राजापत्यं पाशुपतं प्रबुद्धं पद्मसंहिता।
वासिष्ठं काश्यपं कल्पं वाराहं भार्गवोत्तरम् ।। 124
प्रफुल्लं वासवं चैव वायुप्रोक्तं तथैव च ।
वारुणं बार्हस्पत्यं च परमेशं च षोडश ।। 125
मतं पाशुपतं प्रोक्तमिति दीप्तागमे श्रुतम् ।
पतिः पशुश्च पाशश्च तदर्थस्त्रिविधो मतः ।। 126
.... सर्वे ते व्यापकाः स्मृताः ।
मायातः कर्मतश्चैव बद्धाः सर्वेश्वराज्ञया ।। 127
कार्यकारणतत्वोत्थ - बुद्धिकर्मानुसारतः ।
कुतश्चित्कारणात्तत्र वैराग्यं जायते यदा ।। 128

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तदा पाशुपतप्रोक्तशिवदीक्षापुरःसरम्।
ज्ञानचर्याद्यनुष्ठानान्मुक्तः शिवसमो भवेत्॥ 129
किञ्चिज्ज्ञत्वादिधर्मस्य निवृत्त्या मुक्तिकालतः।
सर्वज्ञत्वादिधर्माणां संभवात् तुल्यता स्फुटा॥ 1300
कैवल्यं शिवसाम्यत्वात्स्यान्मुक्तिर्निर्मलात्मनः।
ईश्वरात्तद्गुणाः सर्वे संक्रमन्ते तदात्मनि॥ 131
पुण्यपूरुषसंपर्कात् पुण्यानीव ततोऽन्यतः।
क्षमावति त्वनाक्रोशात्पुण्यवद्भिः सहस्थितेः॥ 132
पुण्यं संक्रमते पुंसामित्यादि वचनात्स्फुटम्।
तथा च शिववन्मुक्ताः सर्वज्ञात्वादिधर्मिणः॥ 133
अपि कृत्यं न कुर्वन्ति स्वार्थनिष्ठा हि ते यतः।
इत्येवं गुणसंक्रान्तः साम्यपक्षो निरूपितः॥ 134

16. प्रवाहनित्येशवादम्

अथ तद्भेदवादः प्रवाहनित्येश्वराभिधः।
कथ्यते पूर्वतः प्रोक्तमङ्गीकृत्य यथोचितम्॥ 135
एकात्मवादरीत्यात्र मन्यन्ते ते शिवात्मनोः।
अन्यत्पाशुपतप्रोक्तवर्त्मना तेन संमतः॥ 136
मुक्तौ तु शिव एवायं मुक्तः कृत्यं करोति सः।
स्वाधिकारादुपरतो न करोति शिवो विभुः॥ 137
ईश्वरात्तद्गुणानां तु संक्रान्तौ निर्मलात्मनि।
तस्य कार्याण्यसौ बुध्वा जगत्सृष्ट्यादि कृत्यतः॥ 138
स्ववत्संसारनिर्वहि पुत्रं हष्ट्वा महामतिम्।
स्वकृत्यादुपरक्ताक्षः सन्यासी स्यात्पिता यथा॥ 139
इति प्रवाहनित्येशवादो लेशात्प्रदर्शितः इति॥ 140A

17. श्रौतपाशुपतम्

श्रौत पाशुरते तत्र प्रत्यक्षादि प्रमाणतः।
ज्ञेयोऽर्थस्त्रिविधो मुक्तिरुत्पत्तिसमता नृणाम्॥ 141

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इत्ययं किं प्रतिपादयति? वैदिकपाशुपतमतं दर्शयति। अत्र प्रागुक्तेषु शैवेषु श्रौतपाशुपतो नाम श्रुत्यनुसारेण शिवायै शिवेनोक्तः उपमन्य्वादिप्रवर्तित इति ज्ञेयम्।

तदुक्तं च -

श्रौतपाशुपतो नाम शतकोटिप्रविस्तरः।
परमार्थप्रदः श्रेष्ठो वायव्यांहि तथा वचः ॥ 142
शैवागमोऽपि द्विविधः श्रौतोऽश्रौतश्च स स्मृतः।
श्रुतिसारमयः श्रौतः स्वतन्त्र इतरो मतः ॥ 143
स्वतन्त्रो दशधा पूर्वं तथाष्टादशधा पुनः।
कामिकादिसमाख्याभिः सिद्धः सिद्धान्तसंज्ञितः ॥ 144
श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः।
परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते ॥ 145
एतत्पाशुपतं श्रौतमथर्वशिरसि स्थितम्।
तत्रोक्तः परमो धर्मश्चर्याद्यैस्तु चतुर्विधः ॥ 146
तथा पाशुपतो भक्तः शिवं प्रत्यक्षयेद् दृढम्।
तस्माच्छ्रेष्ठमनुष्टानं योगे पाशुपते मते ॥ 147
श्रीकण्ठेन शिवेनोक्तः शिवायै स शिवागमः।
शिवाश्रितानां सर्वेषां श्रेयसामेकसाधनम् ॥ 148
युगावर्तेषु सर्वेषु योगाचार्यस्वरूपिणा।
तत्र तत्रावतीर्णेन शिवेनैव प्रवर्त्यते ॥ 149
संक्षिप्यास्य प्रवक्तारः चत्वारः परमर्षयः।
रुरूर्दधीचोऽगस्त्यश्च उपमन्युर्महायशाः ॥ 150
ते च पाशुपताः ज्ञेयाः संहिताभ्यासवर्तकाः।
तत्सन्ततीया गुरवः शतशोऽथ सहस्रशः ॥ 151

अथात्र वैदिकपाशुपते प्रत्यक्षादिप्रमाणसिद्धानां पदार्थानां त्रैविध्यकथनं वेदान्तवाक्यानां विशिष्टाद्वैतार्थं कृत्वा कामिकाद्युक्तवत्सर्वेषां पदार्थानां पतिपशुपाशेष्वेव संग्रहाभ्युपगमात्। तदुक्तंच -

शैववैदिकसिद्धानि यानि नामानि तानि वै।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्रत्यक्षमनुमानाख्यमुपमानागमौ तथा ।। 152
अर्थापत्त्यादिमानानि श्रौतपाशुपते मते ।
प्रामाण्यं स्वत एव स्यात्तत्र वैदिकशैववत्।। 153
अथ तन्मानसंसिद्धं वस्तु च त्रिविधं स्मृतम् ।
अजडश्च जडश्चैव नियन्तृ च तयोरपि ।। 154
पशुः पाशः पतिश्चैव कथ्यते त्रितयं क्रमात् ।
अक्षरं च क्षरं चैव क्षराक्षरपरं तथा ।। 155
तदेवं त्रितयं भूयः कथ्यते तत्ववादिभिः ।
अक्षरं पशुरित्युक्तं क्षरं पाश उदाहृतः ।। 156
क्षराक्षरपरं यत्तत्पतिरित्यभिधीयते ।
इति तल्लक्षणोक्त्या च तथैवं हि श्रुतं पुनः ।। 157

वायुः-
प्रकृतिः क्षरमित्युक्ता पुरुषोऽक्षरमुच्यते ।
द्वाविमौ प्रेरयत्यन्यः परमः परमेश्वरः ।। 158
मुनयः-
.... पुरुषो मतः ।
अनयोः केन संबन्धः को वा प्रेरक ईश्वरः ।। 159
वायुः-
माया प्रकृतिरुद्दिष्टा पुरुषो मायया वृतः ।
सम्बन्धो मलकर्मभ्यां शिवः प्रेरक ईश्वरः ।। 160
मुनयः-
मलः किदृक् कुतो ह्यस्य शिवत्वं च शिवः कुतः ।। 161
वायुः-
माया माहेश्वरी शक्तिश्चिद्रूपो मायया वृतः ।
मलश्चिच्छादको नैजो विशुद्धिः शिवता स्वतः ।। 162
मुनयः-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आवृणोति कथं ह्येषा व्यापिनं केन हेतुना।
किमावृत्तिः तस्य पुंसः केन सर्व निवर्तते ।। 163

वायुः-
आवृतिः व्यापितोऽपिस्यात् व्यापि यस्मात् कलादपि।
हेतुः कर्मैव भोगार्थो निवर्तेत मलक्षयात् ।। 164

मुनयः-
कलादि कथ्यते किं तत्कर्म वा किमुदाहृतम्।
तत्किमादि किमन्तं च किं फलं वा किमाश्रयम् ।। 165
तस्मै भोगश्च भोग्यं च किं वा तद्भोग्यसाधकम्।
मलक्षयस्य हेतुः कः कीदृक् क्षीणमलः पुमान् ।। 166

वायुः-
कला विद्या च रागश्च कालो नियतिरेव च।
कलाद्याश्च समाख्याता यैर्युक्तः पुरुषो भवेत् ।। 167
पुण्यपापात्मकं कर्म सुखदुःखफलं तु तत्।
अनादिफलभोगान्तमज्ञानार्थसमाश्रयम् ।। 168
भोगः कर्मविनाशाय भोगमव्यक्तमुच्यते।
बाहयान्तःकरणैर्द्वारं शरीरं भोगसाधकम् ।। 169
भावातिशयलभ्येन प्रसादेन मलक्षयः।
क्षीणे चात्ममले तस्मिन् पुमान् शिवसमो भवेत् ।। 170

मुनयः-
कलादि पञ्च तत्वानां किं कर्म पृथगुच्यते।
भोक्तेति पुरुषश्चोति येनात्मा व्यपदिश्यते ।। 171
किमात्मकं तदव्यक्तं केनाकारेण भुज्यते।
किं तस्य कारणं भुक्तौ शरीरं च किमुच्यते ।। 172

वायुः-
दृक् क्रिया व्यष्टिका विद्या कलारागप्रवर्त्तिका।
कालोऽवच्छेदकस्तत्र नियतिस्तु नियामिका ।। 173
अव्यक्तं कारणं यत्तत् त्रिगुणप्रभवाप्ययम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्रधानं प्रकृतिश्चेति यदाहुस्तत्वचिन्तका: ।। 174
कलातस्तदभिव्यक्तमनभिव्यक्तलक्षणम् ।
सुखदु:ख विमोहात्मा भिद्यते गुणतस्त्रिधा ।। 175
सत्वं रजस्तम इति गुणा: प्रकृतिसंभवा: ।
प्रकृतौ सूक्ष्मरूपेण तिले तैलमिवस्थिता: ।। 176
सुखं च सुखहेतुश्च समासात्सात्विकं स्मृतम् ।
तामसं तद्विपर्यासात्तावुभौ हेतु राजसम् ।।? 177
सात्विक्यूर्ध्वगति: प्रोक्ता तामसी स्यादधोगति: ।
मध्यमानुगतिर्या सा राजसी परिपठ्यते ।। 178
तन्मात्रापञ्चकं चैव भूतपञ्चकमेव च ।
ज्ञानेन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियाणि च ।। 179
प्राकृतं मानसं बुद्धिरहङ्कारो गुणत्रयम् ।
समासादेवमव्यक्तं सविकारमुदाहृतम् ।। 180
तत्कारणदशापन्नमव्यक्तमिह कथ्यते ।
व्यक्तं कार्यदशापन्नं शरीरादि घटादि च ।। 181
यथा घटादिकं कार्यं मृदादि कारणं स्मृतम् ।
शरीरादि तथाव्यक्तमव्यक्तं नातिभिद्यते ।। 182
तस्मादव्यक्तमेवैकं कारणं करणानि च ।
शरीरं च तदाधारं तद्भोग्यं चापि नेतरत् ।। 183

मुनय: -
बुद्धीन्द्रियशरीरेभ्यो वस्तुनोऽपि कुतो भिदा ।। 184B

वायु: -
बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तो विभुर्महान् ।
तथा तद्वद्भिदात्मेति हेतुस्तत्र सुदुर्गम: ।। 185
बुद्धीन्द्रियशरीराणां नात्मता सद्भिरिष्यते ।
स्मृतेरनियतज्ञानाद्यथा वै देहवेदनात् ।। 186
अत: स्मार्तानुभूतानामशेषज्ञेयगोचर: ।
अन्तर्यामीति वेदेषु वेदान्तेषु च गीयते ।। 187

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सर्वतन्त्रः स सर्वत्र व्याप्य तिष्ठति शाश्वतः ।
तथापि क्वापि केनापि व्यक्तमेष न दृश्यते ।। 188
न चायं चक्षुषा ग्राह्यो न परैरिन्द्रियैरपि ।
मनसैव प्रदीप्तेन महानात्मावसीयते ।। 189
न च स्त्री न पुमानेष नैव चापि नपुंसकः ।
नैवोर्ध्वं नापि तिर्यक्च नाधस्ताच्च कुतश्चन । 190
अशरीरः शरीरेषु चलेषु स्थाणुरव्ययः ।
सदा पश्यति तद्धीरो नरः प्रत्यवमर्शनात् ।। 191
किमत्र बहुनोक्तेन पुरुषो देहतः पृथक् ।
अपृथक् ये तु पश्यन्ति न सम्यक् तेषु दर्शनम् ।। 192
यच्छरीरमिदं प्रोक्तं पुरुषस्य ततः परम् ।
अशुद्धमवशं दुःखमध्रुवं च न विद्यते ।। 193
विवदाम्बुजभूतेन पुरुषस्तेन संगतः ?।
सुखी दुःखी विमूढश्च भवति स्वेन कर्मणा ।। 194
अद्भिरासेवितं क्षेत्रं जनयत्यञ्जसा यथा ।
अज्ञानाप्यायितं कर्म देहं जनयते तथा ।। 195
अत्यन्तमसुखा वासा रुग्णाश्चैकान्तमृत्यवः ।
अनागता अतीताश्च तनवोऽस्य सहस्रशः ।। 196
मृत्या गत्या च शीर्णेषु शरीरेषु शरीरिणाम् ।
अत्यन्तवसतिः कापि न केनापि च लभ्यते ।। 197
छादितश्च वियुक्तश्च शरीरैरेष लक्ष्यते ।
चन्द्रविम्बवदाकारे तरलैः अत्रसंचयैः ।। 198
अनेकदेहभेदेन भिन्ना वृत्तिरिहात्मनः ।। 199B
अष्टपादपरिक्षेपेष्वक्षमुद्रेव लक्ष्यते ।
नैवास्य विहितः कश्चिन्नासौ भवति कस्यचित् ।। 200
पथि सङ्गम एवायं दारैरन्यैश्च बन्धुभिः ।
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।। 201
समेत्य च व्यपेयातां तद्वत्भूतसमागमः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स पश्यति शरीरं तच्छरीरं नैव पश्यति ।। 202
तौपश्यति परः कश्चित्परं तौ नैव पश्यतः ।
ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः ।। 203
पशूनामेव सर्वेषां प्रोक्तमेतन्निबोधत ।
य एषो बध्यते पाशैः सुखदुःखाशनः पशुः ।। 204
क्रिया साधनभूतोऽयमीश्वरस्येति सूरयः ।
अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।। 205
ईश्वरप्रेरितो गच्छेदभ्रं वा स्वर्गमेव वा । 206A

मुनयः-
योऽयं पशुरिति प्रोक्तो यश्च पाश उदाहृतः ।
आभ्यां विलक्षणः कश्चित्कथमस्त्यनयोः पतिः ।। 207
अस्ति कश्चिदपर्यन्तरमणीयगुणान्वितः ।
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ।। 208
औदार्य वीर्य गाम्भीर्य स्वभावकरुणालयः ।
पतिर्विश्वस्य निर्माता पशुपाशविलक्षणः ।। 209
अभावे तस्य विश्वस्य सृष्टिरेषा कथं भवेत् ।
अचेतनत्वात्प्रकृतेरज्ञत्वात्पुरुषस्य च ।। 210
प्रधानपरमाण्वादि यावत्किञ्चिदचेतनम् ।
न तत्कर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना ।। 211
जगच्च तत्कर्त्रपेक्षं कार्यं सावयवं यतः ।। 212A
तस्मात्कार्यस्य कर्तृत्वं पत्युर्न पशुपाशयोः ।
पशोरपि च कर्तृत्वं पत्युः प्रेरणपूर्वकम् ।। 213
अयथाकरणज्ञानादण्डस्य गमनं यथा ।
आत्मानं च पृथक्कृत्वा प्रेरितारं तथा पृथक् ।। 214
असौ जुषस्ततस्तेन हयमृतत्वाय कल्पते ।
पशो पाशस्य पत्युश्च तत्त्वतोऽस्ति यदन्तरम् ।। 215
ब्रह्मवित्तद्विदित्वैवं योनेर्मुक्तो भविष्यति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

संयुक्तमेतद्द्वितयं क्षरमक्षरमेव च ।। 216
व्यक्ताव्यक्तं बिभर्तीशो विश्वं विश्वविमोचकः ।
भोक्ता भोग्यं प्रेरयिता मन्तव्यं त्रिविधं स्मृतम् ।। 217
नातः परं विजानद्भिः वेदितव्यं हि किञ्चन ।
तिलेषु वा यथा तैलं दन्धि वा सर्पिषं यथा ।। 218
यथाऽऽपः स्रोतसा व्याप्ता यथाऽरण्ये हुताशनः ।
एवं महात्मनात्मानमात्मन्यपि विलक्षणम् ।। 219
सत्येन तपसा चैव नित्ययुक्तोऽनुपश्यति ।
य एको जालवानीश ईशिनीभि स्वशक्तिभिः ।। 220
सर्वानिमान्वशे कृत्वा एक एव स ईशते ।
एक एव तदा रुद्रो न द्वितीयश्च कश्चन ।। 221
संसृज्य विश्वं भुवनं गोप्ता संचुकोच सः ।
विश्वतश्चक्षुरेवायं उतायं विश्वतो मुखः ।। 222
तथैव विश्वतो बाहुर्विश्वतः पादसम्युतः ।
द्यावाभूमी च जनयन् देव एकः पुरातनः ।। 223
स एव सर्वदेवानां प्रभवश्चोद्भवस्तथा ।
हिरण्यगर्भं देवानां प्रथमं तु नयेदयम् ।। 224
विश्वस्मादधिको रुद्रो महर्षिरिति शुश्रुम ।
वेदाहमेतं पुरुषं महान्तममृते ध्रुवम् ।। 225
आदित्यवर्णं तमसः परस्तात्तत्संज्ञितं विभुम् ।
यस्मान्नास्ति परं किञ्चिदपरं परमार्थतः ।। 226
नानीयो नास्ति तज्ज्यायो तेन पूर्णमिदं जगत् ।
सदैको वृक्षवत्स्तब्धः केवलो दिवि तिष्ठति ।। 227
संकल्पप्रभवं तस्य चराचरमिदं जगत् ।
सर्वाननशिरोग्रीवः सर्वभूतगुणाशयः ।। 228
सर्वव्यापी च भगवान् तस्मात्सर्वगतः शिवः ।
सर्वतः पाणिपादो यः सर्वतोऽक्षिशिरोमुखः ।। 229
सर्वतः श्रुतिमानेव सर्वमाश्रित्य तिष्ठति ।
सर्वेन्द्रियगुणाभावः सर्वेन्द्रियविवर्जितः ।। 230
सर्वस्य प्रभुरीशानः सर्वस्य शरणं सुहृत् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अचक्षुरपि यः पश्यत्यकर्णोऽपि श्रृणोति यः ।। 231
सर्वं वेत्ति न वेत्तास्य तमाहुः पुरुषं परम् ।
अणोरणीयान्महतो महीयानयमव्ययः ।। 232
गुहायां निहितश्चापि जन्तोरस्य महेश्वरः ।
सतं च पुरुषं व्याप्य महिमातिशयान्वितम् ।। 233
धातुप्रसादादीशानं वीतशोकः प्रपश्यति ।
वेदाहमेतमजरं पुराणं सर्वगं विभुम् ।। 234
निरोधं जन्मनो यस्य वदन्ति ब्रह्मवादिनः ।
एकानेकविभिन्नात्मा बहुधा शक्तियोगतः ।। 235
विदधाति विहृत्यान्ते विश्वमादौ महेश्वरः ।
विश्वधात्री त्वजारव्याता वी....च प्रकृतिः समुता ।। 236
तामजां लोहितां कृष्णां शुक्लां कृष्णां तमः पराम् ।
.... प्रमाणं स विरूपिणम् ।। 237
तामेकः सेवतेऽन्यस्तु भुक्तभोगां जहाति च ।
द्वौ सुपर्णौ च सयुजौ समानं वृक्षमास्थितौ ।। 238
एकोऽत्ति पिप्पलं स्वादु परोऽनश्नन् प्रपश्यति ।
वृक्षेऽस्मिन् पुरुषो मग्नः मुह्यमानस्तु शोचति ।। 239
जुष्टमन्यं यदा पश्येदीशं परमकारणम् ।
तदास्य महिमानं च वीतशोकः सुखी भवेत् ।। 240
तपांसि यज्ञाः क्रतवो यद्भूतं भव्यमेव हि ।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।। 241
तस्यास्त्ववधश्चरैरेव व्याप्तं सर्वमिदं जगत् ।
सूक्ष्मातिसूक्ष्ममीशानं कलिलस्यापि मध्यमम् ।। 242
स्रष्टारमपि विश्वस्याधिष्ठितारं च कस्य तु ।
विश्वमेवेश्वरं ज्ञात्वा शान्तिमत्यन्तमृच्छति ।। 243
स एव कालो गोप्ता च विश्वस्याधिपतिः पतिः ।
तं विश्वाधिपतिं ज्ञात्वा मृत्युपाशाद्विमुच्यते ।। 244
घृतात्परं मध्यमिव सूक्ष्मं ज्ञात्वाऽधिपं शिवम् ।
सर्वभूतेषु गूढं च सर्वपापैः प्रमुच्यते ।। 245

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

एष एव परो देवो विश्वकर्मा महेश्वरः ।
हृदये सन्निविष्टं तं ज्ञात्वैवामृतमश्नुते ।। 246
यदा तमस्तन्न दिवि न रात्रिर्न सदप्यसत् ।
केवलः शिव एवैकः यतः प्रज्ञा पुरातनी ।। 247
नैनमूर्ध्वं च तिर्यक् च न मध्ये परिजग्रमत् ।
न तस्य प्रतिमा चास्ति तस्य नाम महद्याशः ।। 248
अजातमृतमेवैकं बुध्वा जन्मनि भीरवः ।
रूद्रस्यास्य प्रपद्यन्ते मोक्षार्थं दक्षिणं मुखम् ।। 249
द्वे अक्षरे ब्रह्म परे अनन्ते समुदाहृते । 250A
विद्याऽविद्ये समाख्याते निहिते यत्र गूढवत् ।
अक्षरं विद्या हृचमृतं विद्येति परिकीर्त्यते ?।। 251
उभे ते ईशते यस्तु सोऽन्यः खलु महेश्वरः ।
एकैकं बहुधा बीजं विकुर्वन्नेव देवपः ।। 252
सर्वाधिपत्यं कुरुते सृष्ट्वा सर्वान् प्रजापतीन् ।
दिश ऊर्ध्वमधस्तिर्यक् वासयन् भ्राजते स्वयम् ।। 253
यो हि स्वभावानप्येको वरेण्यस्त्वधितिष्ठति ।
स्वभावाद्वाचिकान् सर्वान् वाच्यांश्च परिणामयन् ।। 254
गुणांश्च भोक्तृ भोग्यत्वे तद्विश्वमधितिष्ठति ।
एतद्वै गुहचोपनिषद् गूढं ब्रह्म परात्परम् ।। 255
ब्रह्मयोनि जगत्पूर्वं विदुर्देवा महर्षयः ।
भावग्राहचमनीडाख्यं भासि भावकरं शिवम् ।। 256
कलासर्गान्तिरं देवं ये विदुस्ते महर्षयः ।
स्वभावमेके मन्यन्ते कालमन्ये विमोहिताः ।। 257
देवस्य महिमा ह्येष येनेदं भ्राम्यते जगत् ।
येनेदं वर्तति नित्यं तथा कालात्मकोऽपि यः ।। 258
तेन गीतमिदं कर्म भूतैः सह विवर्तते ।
स्वेनैव भूयसः कृत्त्वे विनिवर्त्य च भूरिशः ।। 259
तत्त्वस्य सह तत्वेन योगं चापि नियोजयेत् ।
तेषामेवावकाळः स्यात् कृतस्यापि च कर्मणः ।। 260

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स एव देवः संयोक्ता तमिद्धं भोक्तृभोग्ययोः। 261A
परस्त्रिकालादधिकः स एव परमेश्वरः।
तं विश्वरूपमभवं भवरूपं प्रजापतिम्॥ 262
देवदेवं जगत्पूर्वं स्वचित्तस्थमुपास्महे।
कार्यादिभ्यः परो यस्मात् प्रपञ्चः परिवर्तते॥ 263
धर्मावहं पापनुदं भगेशं विश्वधाम च।
तमीश्वराणां परमं देवतानां च दैवतम्॥ 264
पतिं पतीनां सर्वेषां विदाम भुवनेश्वरम्।
देवदेवं जगत्पूर्वं स्वचित्तस्थमुपास्महे॥ 265
न तस्य विद्यते कार्यं कारणं च न विद्यते।
न तत्समो नाधिकश्च क्वचिज्जगत्ति दृश्यते॥ 266
परास्य विविधा शक्तिः श्रुतौ स्वाभाविकी श्रुता।
ज्ञानमिच्छा क्रिया चैव तेन विश्वमिदं कृतम्॥ 267
न तस्यास्ति पतिः कश्चिन्नैव लिङ्गं च शीतला?। 268A
कारणं कारणानां च स तेषामधिपाधिपः।
न चास्य जनिता कश्चिन्नैव जन्म कुतश्चन॥ 269
न जन्म हेतवस्तद्वन्मलमायादि संज्ञकाः।
स एकः सर्वभूतेषु गूढो व्याप्तश्च सर्वतः॥ 270
सर्वभूतान्तरात्मा च कर्माध्यक्षः स कथ्यते।
सर्वभूताधिवासश्च साक्षी वेत्ता च निर्गुणः॥ 271
एको वशी निष्क्रियाणां बहूनां विवशात्मनाम्।
समासेन च सर्वाणि करोति च यथोचितम्॥ 272
तमेवात्मनि तिष्ठन्तं ये पश्यन्ति मुमुक्षवः।
तेर्षामेव सुखं नित्यं नेतरेषां महात्मनाम्॥ 273
नित्यानामप्यसौ नित्यश्चेतनानां च चेतनः।
एको बहूनां चाकामः कामानेकान् प्रयच्छति॥ 274
सांख्ययोगादिगम्यं तत्कारणं जगतः परम्।
ज्ञात्वा देवं पशुः पाशैः सर्वैरपि विमुच्यते॥ 275

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विश्वकृद्विश्ववित्स्वात्मा योनिज्ञः कालविद्गुणी ।
प्रधानक्षेत्रविन्निर्गुणेशः पाशविमोचकः ।। 276
ब्रह्माणं विदधे पूर्वं वेदांश्चोपादिशत्स्वयम् ।
यो वेद तमहं बुध्वा स्वात्मबुद्धिप्रसादतः ।। 277
मुमुक्षुरस्मात्संसारात्प्रपद्ये शरणं शिवम् ।
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।। 278
अमृतस्य परंसेतुं दग्धेन्धनमिवानलम् ।
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।। 279
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ।
तपः प्रसादाद्देवस्य प्रसादाच्च महर्षयः ।। 280
विश्रमोचितमात्मानं पवित्रं परपावनम् ।
वेदान्तपरमं गुह्यं पुरा कल्पप्रचोदितम् ।। 281
ब्रह्मणो वदनाल्लब्धं मयेदं भाग्यगौरवात् ।
इत्येवं त्रिपदार्थास्ते कथिताः सङ्ग्रहात्पुनः ।। 282
कथ्यन्ते पञ्चधा पाशा मलमायाद्वयं पुनः ।। 283A
अनुग्रहतिरोधायी शक्तिः पञ्चविधा तथा ।
तत्र मायाद्वयोद्भूतं षट्त्रिंशत्तत्वजातकम् ।। 284
पञ्च भूतानि तन्मात्रपञ्चकर्मेन्द्रियाणि च ।
ज्ञानकर्मबिभागेन पञ्च पञ्च विभागशः ।। 285
त्वगादि धातवः सप्त पञ्च प्राणादिवायवः ।
मनश्चाहंकृतिः ख्यातिर्गुणाश्च प्रकृतिः पुमान् ।। 286
रागो विद्या कला चेति नियतिः काल एव च ।
माया च शुद्धविद्या च महेशश्च सदाशिवः ।। 287
शक्तिश्च शिवतत्त्वं च तत्त्वानि क्रमशो विदुः ।
महामाया च मायेति प्रकृतिस्त्रिगुणेति च ।। 288
त्रिविधा कार्यभेदेन सा प्रभिन्ना षडध्वनः ।
स वागर्थमयश्चाध्वा षड्विधो निखिलं जगत् ।। 289
इत्यादि वचनादेवं पशुभेदश्च कथ्यते ।
सकलाश्च तथा सर्वे विमलाः प्रलयाकलाः ।। 290

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मलैकमात्रसम्बन्धास्ते विज्ञानकला मताः ।
तदवान्तरभेदेन भिद्यते बहुधा पुनः ।। 291
एतद्विविधपाशानां पशूनां पतिरीश्वरः ।
स्थानभोगाधिकारादिवशेन बहुधा पुनः ।। 292
भिद्यते तत्तदात्मानुग्रहेणैव तथा वचः ।
पक्वात्मानः क्रमाद्भिन्नाः एकद्वित्रिमलाः क्रमात् ।। 293
एक द्वित्रि मलान्सर्वान् शिव एकोऽधितिष्ठति ।
अशिवात्मकमप्येतच्छिवेनाधिष्ठितं यथा ।। 294
अरुद्रात्मकमप्येवं रुद्रैर्जगदधिष्ठितम् ।
अण्वन्ता हि महाभूमिः शतरूद्राद्यधिष्ठिता ।। 295
मायान्तमन्तरिक्षं तु अमरेशादिभिः क्रमात् ।
अङ्गुष्ठमात्रपर्यन्तः समन्तात्सन्ततं तथा ।। 296
महामायावसाना द्यौर्वामाद्यैर्भुवनाधिपैः ।
अनाश्रितान्तैरध्वान्तवर्तिभिः समधिष्ठिता ।। 297
इत्येवं तदधिष्ठानभेदः स कथितः पुनः ।
शिवस्य परिपूर्णस्य परानुग्रहमन्तरा ।। 298
न किञ्चिदपि कर्तव्यमिति साधु विनिश्चितम् ।। 299A
स्वभावादेष पर्याप्तः परानुग्रहकर्मणि ।
अन्यथान्यत्स्वभावेन न किमप्यनुगृहयते ।। 300
परं सर्वमनुग्राहचं पशुपाशादिकं जगत् ।
परस्यानुग्रहार्थं तु पत्युराज्ञासमन्वयः ।। 301
यत्तत्पुनरनुग्राहचं परतन्त्रं तदिष्यते ।
अनुग्रहादृते नास्य भुक्तिमुक्ती त्वनन्वयात् ।। 302
मूर्त्यात्मानीऽप्यनुग्राह्याः शिवज्ञाननिवर्तनात् ।
अज्ञानाधिष्ठितं किञ्चिदिह शम्भोर्न विद्यते ।। 303
येनोपलक्ष्यतेऽस्माभिः सकलेनापि निष्कलः ।
स मूर्त्यात्मा शिवस्यैव मूर्तिरित्युपचर्यते ।। 304
न हयसौ निष्कलः साक्षात् शिवः परमकारणः ।
स्वाकारेणानुभावेन तेनाप्यनुपलक्षितः ।। 305

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्रमाणगम्यतामात्रं तत्सद्भावोपपादकम्।
न तावताऽनपेक्षा धीरुपलभ्येत लक्षणम्॥ 306
यथा काष्ठाद्यानारूढो न वन्हिरुपलभ्यते।
एवं शिवोपि मूर्त्यात्मन्यनारूढ इति च स्थितिः॥ 307
यथाग्निमानयेत्युक्ते ज्वलत्काष्ठादृते स्वयम्।
नाग्निरानीयते तद्वत्पूज्यो मूर्त्यात्मना शिवः॥ 308
तत एव हि पूजार्थं मूर्त्यात्मपरिकल्पनम्।
मूर्त्यात्मनि कृतं साक्षाच्छिव एव कृतं यतः॥ 309
लिङ्गादावर्पितं द्रव्यमाचार्येऽपि विशेषतः।
तत्तन्मूर्त्यात्मभावेन शिवोऽस्माभिरुपास्यते॥ 310
यथानुगृह्यते सोऽपि मूर्त्यात्मा परमात्मना।
तथा मूर्त्यम ..... न परतो वयम्॥ 311
लोकानुग्रहणायैव शिवेन परमेष्ठिना।
सदाशिवादयःसर्वे मूर्त्यात्मानोऽप्यधिष्ठिताः॥ 312
तेऽपि मूर्त्यात्मभावेन लब्ध्वा स्वयमनुग्रहम्।
कुरुते चानुगृह्णन्ति शिवेन समधिष्ठिताः॥ 313
आत्मनामेव भोगाय मोक्षाय च विशेषतः।
मूर्त्यात्मस्वपि रागाद्या दोषाः सन्त्येव वस्तुतः॥ 314
तथापि तेषामेवैते न शिवस्य तु सर्वथा।
अग्नावपि समाविष्टे .... ख कालतः॥ 315
इति नाग्निरसौ तत्र ताम्रसंसर्गकारणात्।
नाग्नेरशुचिसंसर्गादशुचित्वमुपेयते॥ 316
अशुचेस्त्वग्निसंयोगाच्छुचित्वमुपजायते।
एवं शोध्यात्मसंसर्गान्नैवाशुद्धः शिवो भवेत्॥ 317
शिवसंसर्गतस्त्वेष शोध्यात्मैव विशुद्धयति।
अयस्यग्नौ समाविष्टे दाह्योऽग्नेरेव नायसः॥ 318
मूर्त्यात्मस्वेवमैश्वर्यमीशस्यैव न चात्मनाम्।
न हि काष्ठो ज्यलत्यूर्ध्वमग्निरेव ज्वलत्यसौ॥ 319
काष्ठस्याङ्गारसंसक्तिरेवमत्रापि योज्यताम्।
तत एव जगच्यस्मिन्काष्ठपाषाणमृत्स्वपि॥ 320

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शिवावेशवशादेव शिवत्वमुपचर्यते।
इत्यतो बहुधा भिन्नः शिवोऽनुग्रहकारणात्॥ 321
तथा चैकात्मवादे तु श्रूयते हि तथा वचः।
आत्मसंज्ञः शिवः शुद्धः एक एवाद्वयः सदा॥ 322
इत्यतो द्वैतसिद्धान्तनिर्णयः स निरस्यते।
अद्वैतमागमशिरोभिरुपासनायामुक्तं तवेति परमार्थतया न वाच्यम्।
भेदः स्फुटो गरुडमान्त्रिकयोरलीकं तदात्म्यभावनमथापि विषं प्रमार्ष्टि॥ 323
इति वेदान्तवाक्यानामावेशाद्वैत ईरितः।
कृतार्थेन विरोधः स्यात् यथा पूर्वमुदाहृतम्॥ 324
स एकः सर्वभूतेषु गूढो व्याप्तश्च सर्वतः।
सर्वभूतान्तरात्मा च कर्माध्यक्षः स कथ्यते॥ 325
तत एव जगत्यस्मिन्काष्ठपाषाणमृत्स्वपि।
शिवावेशवशादेव शिवत्वमुपचर्यते॥ 326
इत्यतोऽत्र समावेशसाम्यमुक्तिश्च निश्चिता। 327A
अथ कृतचर्याक्रियायोगनिष्ठानां कर्मसाम्यमलपरिपाकवशात् शक्तिनिपातयुक्तानां साधकानामेव मुक्तिप्रतिपादनमितरेषां शिवज्ञानानु दयात् न मुक्तेः सम्भव इति। तदुक्तं च -:
शिवचर्यादिसंपत्त्या शक्तिपातपवित्रितः।
योग्यो निर्वाणदीक्षायां ततोऽनुष्ठानतत्परः॥ 328
मुक्त एव भवेन्नान्ये वायव्यां हि तथा वचः।
शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति॥ 329
अन्यथा तु तथा कृष्ण तत्र शुद्धिर्नजायते।
न विद्या न शिवाचारो विमुक्तिर्न च सिद्ध्यति॥ 330
तस्मादङ्गानि संवीक्ष्य शक्तिपातस्य भूरिशः।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत्॥ 331
यो तथा कुरुते मोहात् स विनश्यति दुर्मतिः।
तस्मात् सर्वप्रयत्नेन गुरुः शिष्यान् परीक्षयेत्॥ 332
लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः।
सा यस्मात्परमा शक्तिः प्रबोधानन्दरूपिणी॥ 333

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

आनन्दबोधयोर्योगमन्तः करणविक्रिया।
यया स्यात्कम्परोमाञ्चस्वरनेत्राङ्गविक्रिया।। 334
शिष्यं तं लक्षणैरेभिर्गुरुः कुर्यात्परीक्षणम्।
ततो दीक्षां गुरुः कुर्यात्सर्वपापविनाशिनीम्।। 335
दीपते येन विज्ञानं क्षीयते पाशबन्धनम्।
तस्मात्संस्कार एवेदं दीक्षेत्यपि च कथ्यते।। 336
शाम्भवी चैव शाक्ती च मान्त्री चैव शिवागमे।
दीक्षोपदिश्यते ज्ञेया शिवेन परमात्मना।। 337
गुरोरालोकमात्रेण स्पर्शात्संभाषणादपि।
सद्यः सञ्जायते प्रज्ञा पाशोपक्षयकारिणी।। 338
सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा।
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः।। 339
यया स्यान्निर्वृतिः सद्यः सेयं तीव्रतरा मता।
तीव्रातु जीवितान्तं या पुंसां पाशविमोचिका।। 340
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु।
गुरुणा योगमार्गेण शाक्ती या क्रियते मता।। 341
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्विका।
मन्दा मन्दतरा लेशात् कर्तव्या गुरुणा बहिः।। 342
तदेवं दीक्षितस्यात्र शैवकर्म च विश्रुतम्।
नाशिवः शिवमभ्यासेन्नाशिवः शिवमर्चयेत्।। 343
नाशिवस्तु शिवं ध्यायेन्नाशिवः शिवमाप्नुयात्।
तस्माच्छैवीं तनुं कृत्वा त्यक्त्वा च पशुभावनाम्।। 344
शिवोऽहमिति सञ्चिन्त्य शैवकर्मसमाचरेत्।
कर्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुच्यते।। 345
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्तिताः।
कर्मयज्ञरताःकेचित्तपोयज्ञरताः परे।। 346
जपयज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा।
ज्ञानयज्ञरताश्चान्ये विशिष्टाश्चोत्तरोत्तराः।। 347
कर्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः।
भोगकामी ततो भुक्त्वा कामासक्तः पुनर्भवेत्।। 348

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अकामो रुद्रभावेन भोगान्भुक्त्वा ततश्च्युतः ।
तपोयज्ञरतो भूत्वा जायते नात्र संशयः ।। 349
तपस्वीति ततस्तस्मिन्भोगान्भुङ्क्त्वा ततश्च्युतः ।
जपध्यानरतो भूत्वा जायते भुवि मानवः ।। 350
जपध्यानरतो मर्त्यस्तद्वैशिष्टचवशादिह ।
ज्ञानं लब्ध्वाऽचिरादेव शिवसायुज्यमाप्नुयात् ।। 351
तस्मान्मुक्तेश्चिराध्येतुं कर्मयज्ञो हि देहिनाम् ।
अकामः कामसंयुक्तो बन्धायैव भविष्यति ।। 352
तस्मात्पञ्चसु यज्ञेषु ध्यानयज्ञरतो भवेत् ।
ध्यानं ज्ञानंच यस्यास्ति तीर्णं तेन भवार्णवात् ।। 353
आत्मस्थं यः शिवं त्यक्त्वा बहिरभ्यर्चयेन्नरः ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत्कूर्परमात्मनः ।। 354
शिवज्ञानं भवेद्धचानाज्ज्ञानं भूयः प्रवर्तते ।
तदुभाभ्यामेव मुक्तिस्तस्माद्धचानरतो भवेत् ।। 355
द्वादशान्तेऽथवा मूर्ध्नि ललाटे भ्रूयुगान्तरे ।
नासाग्रे वाथवा नेत्रे कन्धरे ह्लदयेऽथवा ।। 356
नाभौवा शाश्वतस्थाने श्रद्धाशुद्धेन चेतसा ।
बहिर्योगविचारेण देवं देवीं च पूजयेत् ।। 357
अथैवं श्रूयते तत्र वायव्यां कुत्रचित्पुनः ।
नामाष्टकमयो योगः शिवेन परिकल्पितः ।। 358
तेन योगेन सहसा शैवी प्रज्ञा प्रवर्तते ।
प्रज्ञया परमं ज्ञानमचिराल्लभते स्थितिम् ।। 359
प्रसीदति शिवस्तस्य यस्य ज्ञानं प्रतिष्ठितम् ।
प्रसादात्परमो योगः स शिवं चापरोक्षयेत् ।। 360
शिवापरोक्ष्यात्संसारकारणं तु वियुज्यते ।
ततः स्यान्मुक्तसंसारो मुक्तः शिवसमोभवेत् ।। इति।। 361

अथात्मनां शिवेन विशिष्टाद्वैतसिद्धसायुज्यप्राप्तौ शिवावेशवशात्तेषां तेन साम्यप्रतिपादनं अन्यथैकात्मवादरीत्या सायुज्यमात्रसिद्धौ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

भूयो भूयः संसारप्राप्तिदोषादिसम्भवात् पुनः समुत्पत्त्यादिसाम्या-
भ्युपगमे त्वद्वैत श्रुतिविरोधादनित्यत्वादिदोषापत्तेः । तदुक्तं च -

श्रौतपाशुरते मुक्तिर्मलापायादनन्तरम् ।
शिवावेशवशादुक्तविशिष्टाद्वैतवर्त्मना ।। 362
शिवधर्मान्वितो मुक्तः शिवैकज्ञानपूर्वकम् ।
आत्मानन्दमवाप्नोति तथैव वचनं श्रुतम् ।। 363
अयस्यग्नौ समाविष्टे दाहोऽग्नेरेव नायसः ।
मूर्त्यात्मसुएवमैश्वर्यमीशस्यैव न चात्मनाम् ।। 364
तत एव जगत्यस्मिन् काष्ठपाषाणमृत्स्वपि ।
शिवावेशवशादेव शिवत्वमुपचर्यते ।। 365
तिलेषु वा यथा तैलं दध्नि वा सर्पिरर्पितम् ।
यथापः स्रोतसा व्याप्ता यथारण्ये हुताशनः ।। 366
एवं महात्मनात्मानमात्मन्यपि विलक्षणम् ।
सत्येन तपसा चैव नित्ययुक्तोऽनुपश्यति ।। 367
तमेवमात्मनिष्ठं तं ये पश्यन्ति मुमुक्षवः ।
तेषामेव सुखं नित्यं नेतरेषां महात्मनाम् ।। 368
ततः स्यान्मुक्तसंसारो मुक्तः शिवसमो भवेत् ।
इत्यादि बहुधा पूर्वं श्रौतशैवमुदाहतम् ।। 369
अथावेशवशादेव शिवधर्मान्वितो यदि ।।
स चात्मा जड एव स्यादिति शङ्का न विद्यते ।। 370
आत्मासौ चेतनो यस्मात् समाविष्टः शिवेन तु ।।
ग्रहैराविष्टपुरुष इव वेत्ति करोति च ।। 371
अन्यथासौ शिवः कुर्यात्पाशाविष्टः स्वकर्म च ।।
घटाविष्टः पिशाचश्च तथैव वचनं श्रुतम् ।। 372
शिवस्य परिपूर्णस्य परानुग्रहमन्तरा ।।
न किञ्चिदपि कर्तव्यमिति साधुविनिश्चितम् ।। 373
स्वभावादेव पर्याप्तं परानुग्रहकर्मणि ।
अन्यथान्यस्वभावेन न किमप्यनुगृह्यते ।। 374

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

परं सर्वमनुग्राह्यं पशुपाशादिकं जगत्।
परस्यानुग्रहार्थं तु पत्युराज्ञासमन्वयः ।। 375
यत्तत्पुनरनुग्राह्यं परतन्त्रं तदिष्यते।
अनुग्रहादृते नास्य भुक्तिमुक्ती त्वनन्वयात् ।। 376
मूर्त्यात्मानोऽप्यनुग्राह्याः इति पूर्वमुदाहृतम्।
सदाशिवादयः सर्वे मूर्त्यात्मानोऽप्यधिष्ठिताः ।। 377
तेऽपिमूर्त्यात्मभावेन लब्ध्वा स्वयं अनुग्रहम्।
अन्यात्मनोऽनुगृह्णन्ति शिवेन समधिष्ठिताः ।। 378
आत्मनामेव भोगाय मोक्षायेत्यादिकं पुनः।
अतो हि परमुक्तौ तत् ज्ञानानन्दः श्रुतः स्फुटम् ।। 379
द्वौ सुपर्णौ च सयुजौ समानं वृक्षमास्थितौ।
एकोऽत्ति पिप्पलं स्वादु परोऽनश्नन्प्रपश्यति ।। 380
वृक्षेऽस्मिन् पुरुषो मग्नो मुह्यमानस्तु शोचति।
जुष्टमन्यं यदा पश्येदीशं परमकारणम् ।। 381
तदास्य महिमानं च वीतशोकः सुखी भवेत्।
रसो ब्रह्म रसं लब्ध्वाऽऽनन्दी भवति नान्यथा ।। 382
निजानन्दं सदा पश्यन्नपश्यत्यखिलं जगत् ।। 383A
इति तत्समता तस्य विमुक्तस्य न सर्वथा।
किन्त्वेकदेशतः सिद्धा यत एवं वचः श्रुतम् ।। 384
नित्यानामप्यसौ नित्यश्चेतनानां च चेतनः।
एको बहूनां चाकामः कामकामान् प्रयच्छति ।। 385
आत्मानं च पृथक् कृत्वा प्रेरितारं तथा पृथक्।
असौ जुष्टस्ततस्तेन ह्यमृतत्वाय कल्पते ।। 386
पशोः पत्युश्च पाशस्य तत्त्वतोऽस्ति यदन्तरम्।
ब्रह्मवित्तद्विदित्वैव योनेर्मुक्तो भविष्यति ।। 387
न तस्य विद्यते कार्यं कारणं च न विद्यते।
न तत्समो नाधिकश्च क्वचिज्जगति दृश्यते ।। 388
सर्वज्ञत्वादि धर्मेषु चैवमेव यतो वचः।
यदा विकासयत्येव रवौ पद्मानि भानुभिः ।। 389

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

समं न विकसन्त्येव स्वस्वभावानुरोधतः।
स्वभावोऽपि हि भावानां भाविनोऽर्थस्य कारणम्॥ 390
न हि स्वभाविनोऽर्थस्यान्तं कार्येषु साधयेत्।
सुवर्णमेकं साङ्गारं द्रावयत्यग्निसङ्गमः॥ 391
एवं पक्वमलानेव मोचयेत शिवः परान्।
यद्यथा भवितु योग्य तत्तथा न भवेत् स्वयम्॥ 392
विना भावयता भर्त्रा स्वतन्त्रः स ततो भवेत्।
स्वभावविमलो यद्वत्सर्वानुग्राहकः शिवः॥ 393
स्वभावमलिनो यद्वदात्मानो जीवसंज्ञिताः॥ 394A
इति वायव्यवचनमथ स्कान्दे विशेषतः।
बध्वा पशूनिमान्पाशैः शरीरकरणादिभिः॥ 395
मोचयेत सदा शम्भुः सर्वज्ञत्वादिशक्तिमान्।
लीलासाधनभूतास्ते ब्रह्माद्याः पशवः प्रभोः॥ 396
सर्वज्ञोऽयमतः शम्भुः सृजत्यवति हन्ति च।
तृप्तो यतः सदादेवः सर्वानुग्राहकः स्मृतः॥ 397
बोधोऽनादिः परस्येति बोधकः सकलात्मनाम्।
स्वतन्त्रशक्तिर्देवेशः पक्वान्मोचयति प्रभुः॥ 398
अलुप्तशक्तिमान्यस्मात्तस्मात् मोचनकारकः।
अनन्ताः शक्तयोऽस्यैव निमित्तमखिलात्मनाम्॥ 399
एवं षडङ्गवान् पञ्चब्रह्मरूपी सदाशिवः।
ज्ञेयः पशुपतिः सर्वैः पशुपाशबिलक्षणः॥ 400
इत्येवमात्मनो भावाच्छिवसाम्यं न सर्वथा।
अनेकेश्वरवादादि दोष एव ततोऽन्यथा॥ 401
तथा तद्वागतः साम्ये यदन्यद् दूषणं श्रुतम्।
केनचित्साधनेनैव मुक्तः शिवसमो भवेत्॥ 402
इत्येवं केचिदिच्छन्ति वादिनो मुनिपुङ्गवाः।
वार्तामात्रमिदं प्रोक्तं सर्वथा न तदर्थवत्॥ 403
एकदेशेन वा जीवः किं वा सर्वात्मना समः।
एकदेशेन चेत्सर्वे शिवाः संसारवर्तिनः॥ 404

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

एकदेशेन सर्वेषामस्ति साम्यं शिवेन हि।
सर्वात्मना चेत्साम्यंस्यात् सर्वथा शिव एव सः ।। 405
भेदकाकारशून्यत्वाद्भेदाभावाच्च वस्तुनः ।। 406A
तस्माज्जीवः स्वतः साक्षात् शिवः सत्यादिलक्षणः।
इतयत्र भागतः साम्ये दूषणं तु न बन्धवत् ।। 407
न सन्ति भाविनां यस्मादात्मानं सर्वथा यतः।
न साम्या सर्वथा साम्ये परिपूर्णमनोरथाः ।। 408
स्वरूपावाप्तिरेव स्यादिति मोक्षस्य लक्षणात्।
तदेव भागतः साम्यं कामिकादौ च विश्रुतम् ।। 409
शिववच्छाश्वतः शुद्धः सृष्टिधर्मविवर्जितः।
इत्याद्येकात्मवादे तु सफुटमुक्तं च दूषणम् ।। 410
त्वन्मते परिविज्ञाननिष्पन्ना अपि मुक्तयः।
भजते नाविसंवादमाम्भसा इव कृष्टयः ।। 411
समुत्पात्याऽथवा साम्ये सद्य एव विनश्यति।
संक्रान्तौ तु न दृष्टान्तो न मान व्यक्तिसाम्यतः ।। 412
न च सृष्टयादि कुर्वन्ति स्वार्थनिष्ठा इतीरणात्।
तथा तत्कृत्यविरहात् सर्वज्ञत्वेन साम्यता ।। 413
सर्वज्ञत्वं शिवस्यापि ज्ञेयं यत्सर्वकृत्यतः।
एवं च सति षाड्गुण्यसाम्यवादो निरस्यते ।। 414
ज्ञत्वकर्तृत्वमूलेन षाड्गुण्यप्रतिपादनात्।
न चास्य कृत्यविरहेऽप्यस्तु सर्वार्थवेदनम् ।। 415
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।
इति न्यायादसाध्यार्थः साधनेऽप्यप्रवृत्तिमान् ।। 416
जगत्कृत्यप्रवृत्तस्य किं तद्विज्ञानतः फलम्।
एवं बहुविधाशेषवस्तुव्यापारदर्शिनः ।। 417
जायते कापि संप्रीतिः सा हि तस्य प्रयोजनम्।
मैवमेतादृशाज्ज्ञानात्प्रीतिलेशो न जायते ।। 418
यन्नास्त्यतिशयः कश्चित्तद्गृहीतेषु वस्तुषु।
अस्य मुक्तस्य सदृशा अन्ये मुक्ताः शिवेन ते ।। 419

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

बद्धास्तद्यजनार्थाश्च न्यूनाः कोऽतिशयस्ततः ।
यदि सृष्टचत्ययं शम्भोः कृत्यातिशयदर्शनात् ।। 420
तदा तत्साम्यवादोऽयं त्वया दत्तजलाञ्जलिः ।। 421A
सति हचतिशये शम्भौ नवतत्वान्तदर्शिनम् ।
कर्तुमर्हसि तस्मात्वं भग्ना सर्वज्ञताप्यसौ ।। 422
किञ्च तच्छिवकृत्यस्य भानं चिदचिदात्मके ।
जगत्येव नचास्पन्दे शिवे मुक्तान्तरेषु वा ।। 423
तन्मुक्तस्य जगच्चेष्टा ज्ञानं तत्स्मरणात्मकम् ।
न्यायो हचनादौ संसारे किं न संभवति स्वयम् ।। 424
अपि वा परमुक्तो तत् ज्ञानं योगविशेषतः ।
यथार्थं विश्वविज्ञानांञ्जीवन्मुक्तः प्रजायते ।। 425
समाधौ मलमुत्सार्य चान्यदेशचरित्रकम् ।
जायते येन तत्सर्वं योगिभिर्योगदर्शनम् ।। 426
इत्यादि वचनं तत्र प्रमाणं परिदृश्यते ।
तदर्थेष्वनुभूतेष्वप्यस्ति नातिशयः कृतः ।। 427
अस्तु वातिशयः कश्चिदस्य प्रीतिकरो न सः ।
दयाकरस्तु बद्धानां दर्शनाज्जायते हि सः ।। 428
यथा तुल्यः शिवोऽप्येषां क्लेशं दृष्टवा कृपानिधिः ।
मुक्तिं करोति कालेन श्रूयते तच्च सर्वतः ।। 429
जगत्सृष्टिस्थितिध्वंसं कारुण्याच्च शिवात्मकम् ।
एवं स्वभावमलिनान् सर्वदा दुःखिनः पशून् ।। 430
स्वाज्ञौषधविधानेन दुःखान्मोचयते शिवः ।
संसारस्येश्वरो नित्यं समूल्य निवर्तकः ।। 431
संसारवैद्य इत्युक्तः स च तत्वार्थविदिभिः ।
यथा वात्र द्वयोर्लोके समं कारागृहस्थयोः ।। 432
विमुक्तोऽन्यतरं वीक्ष्य नासौ सुप्रीतिमृच्छति ।
किं तु तं दयते क्लेशात्तथा बद्धं च मुक्तिभाक् ।। 433
तथा सति स चाकिञ्चित्करः सन्दुःखितः सदा ।
अन्यथा प्रीतियुक्तश्चेत्स हि दुष्टतमो भवेत् ।। 434

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तथा तज्ज्ञानतस्तुष्टिर्न शिवस्यापि विश्रुता।
न शिवेन विना किञ्चित्प्रवृत्तिरिह् विद्यते ।। 435
तत्प्रेरितमिदं सर्वं तथापि न स तुष्यति।
शक्तिराज्ञापिका तस्य नियन्त्री सर्वतो मुखी ।। 436
तया ततमिदं विश्वं तथापि न स तुष्यति।
वायव्ये हि ततश्चोक्तमेवं त्वन्मतवादिभिः ।। 437
नात्मच्छेदोऽपवर्गो न च पशुशिवयोरैक्यमत्रापवर्गो।
नाविद्याग्रासहानिर्नच गुणविलयो नापि पाषाणमुक्तिः ।। 438
यद्बोधानन्दरूपत्रिमलविगमने व्यक्तमात्मस्वरूपं।
तन्सायुज्येनवाच्यं शिवसदृशविभुः शैवतन्त्रेऽपवर्गः ।। 439
पश्यन्वागविनान्तं तत् कर्मवैचित्रयवेष्टितम्।
मुक्तस्तिष्ठति तुष्णीको यदिहास्य पुमर्थता ।। 440
नह्यन्यतरदत्रेष्टप्राप्त्यनिष्ठप्रहाणयोः।
ततश्च शिवसाम्योक्तरीत्या युक्ति पुरःसरम् ।। 441
विशिरान्तरतः सिद्धः सर्वज्ञत्वादिधर्मतः।
शिव धर्मान्वितो मुक्तो जीवः शिवसमो भवेत् ।। 442
इत्येवं संग्रहादेव श्रौतपाशुपतो मतः।
दर्शितं चात्र वायव्यसंहितावचनादिभिः ।। 443

18. गारुड शैवम्

दृष्टादृष्टार्थसंसिद्धशास्त्रेषु सकलेषु च।
लोकविश्वासहेतोस्तत् दृष्टार्थप्रतिपादनम् ।। 444
गारुडं दक्षिणं वामं भूततन्त्रं तथैव च।
चतुर्विधानि शास्त्राणि पुरुषाद्युदितानि च ।। 445
अधः स्रोतांसि शैवानि मूर्तिभिः पुरुषादिभिः।
विज्ञानकेवलैरुद्रैः प्रेर्यस्ततत्पुरुषादिभिः ।। 446
प्रवर्तितानि तान्येवं कामिकाद्यनुसारतः।
अस्वतन्त्रतयोक्तानि तेषु गारुड उच्यते ।। 447

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्पूरुषब्रह्मरूपः पूजनीयो जगत्पतिः ।
तदुपासनया सिद्धप्रत्यक्षमिदमुच्यते ।। 448
यन्मन्त्रौषधसंसिद्धं चिकित्साजातमुत्तमम् ।
दक्षिणे घोररूपं तु परं ब्रह्म जगत्पतिः ।। 449
साधकैः पूजनीयः स्यात् स्वाभीष्टार्थप्रसिद्धये ।
तथा स्वाभीष्टसिध्यर्था लोकेशत्रुजयादयः ।। 450
वामे तु वामदेवः स्यात् पूजनीयो महेश्वरः ।
ततः प्रत्यक्षसिद्धार्था रसबौद्धादयो मताः ।। 451
सद्यो जातं तु यद्ब्रह्म भूततन्त्रे तु पूज्यते ।
भूतप्रेतचिकित्सादिः प्रत्यक्षार्थं इहोच्यते ।। 452
इत्येवं संग्रहेणोक्ताः शैवास्ते गारुडादयः ।
अन्यथाप्यस्ति चेदेवं तत्र तत्रावधार्यताम् ।। 453

19. योगशैवम्

शिवयोगिमते मुक्तिः सारूप्यमिति कथ्यते ।
न तु सालोक्य सामीप्य पदावाप्तीति ये स्मृते ।। 454
न श्रेष्टौ पुरुषार्थौ तावसंपूर्णमनोरथौ ।
शिवसारूप्यसंप्राप्तिः शिवत्वप्राप्तिरिष्यते ।। 455
सा मुक्तिः शिवसाम्येति सिद्धान्ते श्रूयते स्फुटम् ।
शिवसमानतारूपं शिवविग्रह एव च ।। 456
सायुज्यमिति तत्प्रोक्तमित्यादि वचनादिह ।
सायुज्यमिति पर्यायः सारूप्यस्येति निश्चयात् ।। 457
अविरोधस्त्वनेकेशवाददोषोऽपि नो भवेत् ।। 458A
शिवप्रसादतो मुक्ता जीवा यस्मात्तथा वचः ।
मुक्तात्मानोऽपि एव विज्ञेयः पञ्चमन्त्रतनुः ।। 459
ततः सारूप्यमुक्तिर्या सा मुक्तिर्योगिनां मते ।
अणिमादि महासिद्धिप्रदा हि परमा मता ।। 460

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

योगशैवाश्च बहवो गृहयन्तेऽत्र चतुर्विधाः।
सिद्धान्तोऽनादिशैवश्च तथाऽवान्तर एव च॥ 461
योगशैवाः चतुर्विधाः एवं संग्रहतो मताः। 462A

20. अवान्तरशैवम्

अवान्तरे तु पूर्वोक्तमङ्गीकृत्य यथोचितम्।
...केशवेऽस्मिन् पदमुक्तिमते पुनः॥ 463
प्रणवः शब्दरूपत्वाज्जडो वर्णादि पञ्चकम्।
जीवानां ज्ञानहेतुः स्यात्तत्तद्विषयगोचरे॥ 464
ब्रह्मादिप्रेरकैः प्रेर्यः परो बन्धस्तथागमः।
अकारश्च उकारश्च मकारो बिन्दुनादकः॥ 465
योगेन प्रणवं ज्ञेयं पञ्चदेवात्मकं परम्।
अकारश्च उकारश्च अहङ्कारं बुद्धिरेव च॥ 466
मकार.... त्कं नादात्मविग्रहम्।
एवं पञ्चप्रकारेण ओङ्कारोहृतमुच्यते॥ 467
तज्ज्ञातस्वात्मबोधस्तु सजलस्य तरङ्गवत्।
अकारं ब्रह्मदैवत्यं उकारं विष्णुदैवतम्॥ 468
मकारं रुद्रदैवत्यं बिन्दुरीश्वर एव च।
नादं सदाशिवं प्रोक्तमित्येताः पञ्च देवताः॥ 469
चतस्रो वृत्तयस्तस्या याभिर्व्याप्तास्त्रिधासवः।
आप्योरपरमो बन्ध एभ्यो मुक्तिस्तु नापरः॥ 470
तन्निवृत्यविनाभूतो दृक्क्रियावारको यतः।
इत्येवं न पतिर्नादस्ततोऽन्यश्चेतनः शिवः॥ 471
स स्तन्मादिस्वरूपेण पञ्चकृत्येन पञ्चधा।?
तेषां शिवैकरूपत्वान्न वैषम्यं परस्परम्॥ 472
नानारूपविकल्पेन ध्येयः सर्वार्थ ईश्वरः।
तस्माद्विष्णुश्च रुद्रश्च ईश्वरश्च तथा शिवः॥ 473
पञ्चधा पञ्चदैवत्यं सकलः परिपठ्यते।
येन येन हि रूपेण साधक संस्मरेत्तदा॥ 474

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः।
इत्यतो मुक्तिसिध्यर्थमुपास्यास्ते तथा क्रमः॥ 475
मूलाधारे स्थितो ब्रह्मा नाभ्यन्तं व्याप्य तेजसा।
नाभिस्थानगतो विष्णुः कण्ठान्तं तु स्वतेजसा॥ 476
कण्ठे रुद्रो ललाटान्तं स्थितो व्याप्य स्वतेजसा।
ललाटे तु महेशः स्याद्ब्रह्मरन्ध्रावधि स्थितः॥ 477
तदूर्ध्वे तु सदेशः स्याद्व्याप्य सर्वं स्वतेजसा।
इति स्वस्वस्थले ध्येयाः स्वतेजोमण्डलान्विताः॥ 478

21. शुद्धशैवयोगम्

अथात्र शुद्धशैवाख्ययोगपक्षो निरूप्यते।
प्रागुक्तपुत्रमार्गेषु शुद्धशैवस्य यन्मतम्॥ 479
तन्मते सिद्धमर्थं तदङ्गीकृत्य यथोचितम्।
पशुः पाशश्च पूर्वोक्तः पतिरेव सदाशिवः॥ 480
महेश्वरादिदेवास्तु तदाज्ञापरिपालकाः॥ 481A
तदर्चायां तु सामीप्यं ध्यानात्सारूप्यमेव च।
तत्तु तत्समता मुक्तिः सा संपूर्णमनोरथा॥ 482
शिवसमानतारूपं शिवविग्रहमेव च।
सायुषार्थेषु परमस्तत्प्राप्तौ साधनात्मकः।
योग एव स कर्तव्यो मृगेन्द्रादिषु विश्रुतः॥ 483
अथवात्मवतां मत्वा स्वाधिकारं सुदुष्करम्।
यतेरन्नात्मवत्तायै देशिकाद्या जिगीषवः॥ 484
तदात्मवत्त्वं योगित्वं जिताक्षस्योपपद्यते।
प्राणायामाद्यनुष्ठानाज्जिताक्षत्वं शनैः शनैः॥ 485
प्राणायामः प्रत्याहारः धारणाध्यानवीक्षणे।
जपः समाधिरित्यङ्गी योगोऽष्टमः स्वयम्॥ 486
प्राणः प्रागुदितो वायुरायामोऽस्य प्रवेदनम्।
प्रेरणा कृष्टिसंरोधलक्षणं क्रतुदोषकृत्॥ 487

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ततः सुखलवास्वादे तेषां वृत्तस्य चेतसः ।
प्रत्याहारो विधातव्यः सर्वतो विनिवर्तनम् ।। 488
तेनेन्द्रियार्थसंसर्गविनिवृत्तेश्चितो मतिः ।
धारणा योग्यतामेति पदे स्वेच्छाप्रकल्पिते ।। 489
चिन्ता तद्विषयध्यानं तच्चादिष्टं मुहुर्मुहुः ।
दृष्टमित्यत्र मन्त्राणि तानि मूर्धादितः स्मरेत् ।। 490
ऊर्ध्वप्राक् दक्षिणादीनि पञ्चेशानेन कल्पयेत् ।
उत्तमाङ्गानि वक्त्राणि वक्त्राम्बुजचतुष्टयम् ।। 491
इत्यादि वचनात्स्पष्टमर्चनापटलादिषु ।
तदेकताननतामेति स समाधिर्विधीयते ।। 492
जपस्तद्घाषणं ध्येयं संमुखीकरणं मुने ।
ऊहो हि वीक्षणंवस्तु विकल्पानन्तरोदितः ।। 493
यदा वेत्ति पदं हेयमुपादेयं च तत्स्थितेः ।
तत्पोषकं विपक्षं च यच्च तत्पोषकं परम् ।। 494
इत्यादिवचनाच्छुद्धशैवयोगोऽवधार्यताम् ।
एवं योगक्रमस्त्वन्ययोगिनामपि संमतः ।। 495
तत्तन्मतानुसारेण सकलध्यानिनां नृणाम् । 496A

22. अनादिशैवम्

अनादिशैवसिद्धान्ते त्वङ्गीकृत्य यथोचितम् ।
पूर्वोक्तेषु विशेषेण कथ्यते लेशतः स्फुटम् ।। 497
शुद्धविद्यादितत्वानां जडता न शिवात्मता ।
नादस्य ज्ञानरूपत्वं स शिवः स्यादिति श्रुतिः ।। 498
न तु शब्दादृते पुंसः प्रत्ययोऽस्ति कदाचन ।
शब्दानुविद्धमेवेह विश्वज्ञानंप्रदृश्यते ।। 499
इति तज्ज्ञानसंसिद्धिः सूक्ष्मादिक्रमतः स्फुटम् ।। 500A
तदेव प्रणवाकारं शिवं चैव तथागमः ।
नादबिन्दूद्भवाकारं ओङ्कारं शुद्धतत्त्वकम् ।। 501

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शुद्धज्ञानं स्वताज्ञांशं शुद्धवर्त्मनि कारणम् ।
ज्ञानबीजं पराकारमोङ्कारं प्रभुरीश्वरः ॥ 502
तत्सादाख्यशिवाकारं कलापञ्चकसम्भवम् ।
अकारोकारमकारबिन्दुनादश्च पञ्चमम् ॥ 503
ओङ्कारं स्वकलाकारं मध्ये वाक्पञ्चकोद्भवम् ।
महासूक्ष्मान्नादमुत्पन्नं सूक्ष्माद्बिन्दुसमुद्भवम् ॥ 504
पश्यन्ती तन्मकारोजमुकारो मध्यमोदयम् ।
अकारोत्पन्नवैखर्या आदिवाक् पञ्चसाधनम् ॥ 505
तन्मध्ये तु महेशश्च रुद्रविष्ण्वात्मभूरिति ॥ 506A
पञ्चमस्य कलाशक्तिः पञ्चकृत्योद्भवं तथा ।
सृष्ट्यादि पञ्चकृत्यर्थं ब्रह्मादि देवसम्भवम् ॥ 507
षट्त्रिंशत्तत्वसंभिन्ना कुटिला शक्तिरुद्भवा ।
कुटिला कुण्डली व्याप्ता कुण्डली प्रणवोदिता ॥ 508
इति सर्वजगत्कर्ता शिवो नादात्मकः स्मृतः ।
स्वस्वावसरभेदेन श्रूयते द्विविधः पुनः ॥ 509
......शब्दब्रह्मपरं तु यत् ।
परं तत्तत्वमुद्दिष्टं ब्रह्मशब्देन शब्दितम् ॥ 510
शब्दब्रह्ममयं यत्तत् सदाशिवमिति स्मृतम् ।
सदाशिवतनुः साक्षात् प्रणवः स्याज्जनार्दन ॥ 511
सर्वकारणभूतोऽसौ देवदेवः सदाशिवः ।
तन्नादो परनादः स्यात् नान्यथेति तथागमः ॥ 512
नादब्रह्म शब्दार्थं ध्यायेदोङ्कारमीश्वरम् ।
इत्येवं वैदिकेऽप्युक्तं श्रूयते च शिवागमे ॥ 513
ममैषा परमा मूर्तिः नादसंज्ञा वरानने ।
चिन्त्यते योगिभिर्नित्यमपुनर्भवकाङ्क्षिभिः ॥ 514
शब्दतत्वे परे लीने ओङ्कारा गतमानसः ।
परमोक्षमवाप्नोति शब्दस्यैवार्थसिद्धये ॥ 515
तत्सिद्धौ लययोगी स्यात् श्रूयते तस्य वैभवम् ॥ 516A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ब्राह्मणानां शतं पुण्यमधिकं वेदवेदिनाम्।
तेषां सहस्रगुणिताः शैवतन्त्रेषु दीक्षिताः ॥ 517
दीक्षितानां च सर्वेषां यजमानो विशिष्यते।
तेभ्यश्च यजमानेभ्यो भस्मलेपी विशिष्यते ॥ 518
भस्मलेपिसहस्राणां पूजकोऽप्यधिको भवेत्।
पूजकानां च सर्वेषां मन्त्रवेत्ता विशिष्यते ॥ 519
मन्त्रवर्णविदां तेषामध्वज्ञाता विशिष्यते।
अध्वविदां सर्वेषां प्रासादज्ञो विशिष्यते ॥ 520
प्रासादज्ञानवेदीनां लययोगी विशिष्यते।
लययोगवतां पुंसां प्राणलिङ्गी विशिष्यते ॥ 521
इत्येवं नासतो मुक्तिः शुद्धतत्त्वसमाश्रया।
अथोपास्तिक्रमः शैवे योगदीक्षापुरःसरम् ॥ 522
ज्ञेयं गुरुमुखादेव शक्तिपातपवित्रितैः।
इत्यनाद्याख्यशैवार्थः कथितः संग्रहादिह ॥ 523

23. सिद्धान्तशिवयोगः

अथ सिद्धान्तशैवस्तु संग्रहेण निगद्यते।
योगसामान्यतः प्रोक्तमङ्गीकृत्य यथोचितम् ॥ 524
पतिः पशुश्च पाशश्च पदार्थस्त्रिविधो मतः।
अशुद्धाध्वा तु पाशः स्यात् कलाभित्तिस्तदुच्यते ॥ 525
पुंस्त्वं पशुरेव स्यान्नत्वन्याश्चेतनो मतः।
पुंस्तत्वं च विना भोगानुपपत्तेः क्वचित् क्वचित् ॥ 526
तस्यात्मेत्यादि संज्ञास्तु तस्यावसरभेदतः।
तदेवं शुद्धशैवाख्ये सिद्धान्ते श्रूयते स्फुटम् ॥ 527
कलोद्वलितचैतन्यो विद्यादर्शितगोचरः।
रागेण रञ्जितश्चापि बुद्ध्यादिकरणैर्युतः ॥ 528
मायाद्यवनिपर्यन्ततत्वभूतात्मवर्त्मनि।
भुङ्क्ते तत्र स्थितान्भोगान् भोगैकरसिकः पुमान् ॥ 529

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्प्रेरकः पतिः सोऽयं शिवतत्त्वात्मको मतः ।
शिवतत्वं यथाप्रोक्तं प्रेरकाख्यमिति श्रुतेः ॥ 530
विदन्त्यक्षाणि पुंसार्थान्न स्वयं सोऽपि शम्भुना ।
इत्येवं तत्प्रयोगश्च मुक्त्युपायस्तु कथ्यते ॥ 531
पतिस्तु शिवतत्वाख्यं पञ्चधा कार्यभेदतः ।
ज्ञानं नादस्वरूपं च क्रियारूपं तु शक्तिकम् ॥ 532
ज्ञानक्रियासमावेशात् सादाख्यं तत्वमुद्भवम् ।
ज्ञानन्यूनं क्रियाधिक्यं तत्वं माहेश्वरं भवेत् ॥ 533
योगाधिक्य क्रियान्यूनं शुद्धविद्याख्यरुद्रकः ।
शुद्धतत्वमिति प्रोक्तं नित्यं स्वातन्त्र्यविग्रहम् ॥ 534
कृत्यभेदं विना नैवमेतत्पूर्वा पराक्रमः ।
इति नानाविधस्त्वेकः शिवो ध्येयस्तथागमः ॥ 535
स तु निरञ्जनः शान्तः सर्वज्ञः सर्वगः प्रभुः । 536A
नानारूपविकल्पेन शिवशक्त्योः प्रधानता ।
सर्वेषामपि मूलत्वादिति ध्येयं मुमुक्षुभिः ॥ 537
तद्व्यष्टिस्थानतो वाथ समष्टिध्यानतः पुनः ।
एवं हि श्रूयते शैवे शुद्धविद्या हिरण्मया ॥ 538
महेश्वरः श्वेतभासः सादाख्यं स्फटिकोपमम् ।
बिन्दुनादस्वरूपं तु श्वेतरक्तप्रकाशकम् ॥ 539
इति तद्व्यष्टितो ध्यानं समष्टिध्यानमुच्यते ।
कुन्देन्दुतुहिनप्रख्यं वृत्तं सर्वार्थदर्शकम् ॥ 540
शिवतत्वं स्मृतं ह्येतत्पञ्चवक्त्रं चतुर्भुजम् ।
एत द्ध्यानादणोर्मुक्तिरणिमादि पुरः सरम् ॥ 541
तदेवं ध्यानतः सिद्धौ भौतिकं तु नियामकम् ।
यस्मान्नाचेतनं तत्वं सिद्धमप्युपकारकम् ॥ 542
शैवं वपुरिति ध्यायेदतो यत्तत्समीहितम् ।
इत्येवं संग्रहेणायं सिद्धान्तः कथितः स्फुटम् ॥ 543

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

24. गुणशैवम्

अथात्र गुणशैवे तु जगत्सर्वं गुणान्वितम्।
कैवल्यं साधकानां तत्त्रिमूर्त्याराधनात् स्मृतम्॥ 544

इत्ययं किं प्रतिपादयति? शुद्धशैवभेदेषु .... सिद्धपदमुक्ति
पादेषु प्रागुद्दिष्टक्रमेण प्रथमं गुणशैवमतं दर्शयति। अत्रगुणशैवो
नाम शुद्धशैव एव। तन्मते विश्वस्य गुणान्वितत्वप्रतिपादनं
प्राकृतप्रपञ्चं विना तदूर्ध्वकलादि तत्वतात्विकार्थानामभ्युपगमात्।
तदुक्तं च -

न तदस्ति जगत्यस्मिन् वस्तु किञ्चिदचेतनम्।
यन्नाव्याप्तं गुणैर्यस्मिन् नैको वा मिश्रको गुणः॥ 545
इति मृगेन्द्रशास्त्रोक्तेर्जगत्सर्वं गुणान्वितम्।
तथा भारतपक्षादौ विस्तरेण च दर्शितम्॥ 546
ततस्तदूर्ध्वमर्धोनकलादि बहुधेरितः।
तथा चास्मिन्मते तत्वं प्रधानाख्यं च कर्म यत्॥ 547
तिरोधायी च पाशः स्यात् सकलः पशवो मताः।
देवादिस्थावरान्ताश्च विज्ञानप्रलयाकलाः।
ब्रह्मा विशणुश्च रुद्रश्च जगत्कर्ता तथागमः॥ 548
अचेतनं विभु सूक्ष्मं भोग्यं साधारणं ध्रुवम्।
चतुर्विंशकमेकं च प्रधानगुणलक्षणम्॥ 549
पुंसां भोगापवर्गार्थमीश्वरेच्छा प्रचोदितम्।
प्रधानाच्च भवेद्बुदिधः जगद्धेतुशिवाज्ञया॥ 550
बुद्धेरपि च संक्षोभादहङ्कारस्त्रिधा भवेत्।
अहङ्काराच्च सूक्ष्माणि तन्मात्राणीन्द्रियाणि च॥ 551
सूक्ष्मेभ्यः पञ्चभूतानि तेभ्यः स्थूलमिदं जगत्।
चतुर्विंशकमव्यक्तं पुरुषः पञ्चविंशकः॥ 552
क्वचित्कलादिभेदानां कथनं तु शिवागमे।
अवस्थान्तरभेदेन प्रकृतेरिति सम्मतम्॥ 553

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अथ तत्पुरुषश्चात्र श्रुतो लक्षणपूर्वकम् ।
किञ्चित्कर्ता स किञ्चिज्ज्ञः पुरुषः पञ्चविंशकः ।। 554
न करोति यतः सर्वं स भोग्यं च करोति च ।
अतः स्वातन्त्रयवान्नायं किञ्चित्कर्तणुरेवच ।। 555
न वेत्ति तत्त्वतः सर्वं तेनाज्ञः पुरुषः स्मृतः ।
इति । अथ त्रिमूर्त्याराधनादेव मुक्तिप्रतिपादनं तदन्यत। या महेश्वरादि देवतानभ्युपगमात् ।
तदुक्तं च
गुणशैवमते कर्ता रुद्र एकस्तथा पुनः ।
त्रिबिधः कृत्यभेदेन गुणाविष्टस्तथागमः ।। 556
संहृत्य भुवनं विश्वं गोप्तान्तः संचुकोच सः ।
एक एव तथा रुद्रो न द्वितीयश्च कश्चन ।। 557
इति स्वायंभुवे प्रोक्तः शिवधर्मोत्तरे पुनः ।
रुद्रः षट्विंशकः प्रोक्तः शिवः परमकारणः ।। 558
प्रधानादभवद्रुद्रः तथा विणुः पितामहः ।
सत्कार्यकरणोपेता स विशुद्धा महेश्वराः ।। 559
जगतः कारणत्वेन त्रयो देवा व्यवस्थिताः ।
इत्येवं च त्रयश्चात्र समा एव परस्परम् ।। 560
तदुपासनया मुक्तिस्तत्तदागमवर्त्मना ।
वैदिकोऽपि च शैवेन नान्यथा मुक्तिरिष्यते ।। 561
इन्द्रादित्यादि देवा ये तदाज्ञापरिपालकाः ।
तदेतद्गुणशैवं तु ज्ञानसिद्धौ च विश्रुतम् ।। 562
जटाचूडामणिर्भस्मधारणं भस्ममिश्रकम् ।
त्रिगुणैश्च त्रिमूर्त्तिः स्याद्भावानां गुणशैवकम् ।। 563

25. परकैवल्यम्

अथातः परकैवल्यमते निष्कळसेवया ।
परमुक्तिः त्रिधा सा तु संग्रहान्नवधा पुनः ।। 564

इत्ययं किं प्रतिपादयति? प्रागुपदिष्टक्रमेण सामान्यतः शुद्धशैवभेद-कर्मावरण सिद्धान्तकलितपरमुक्ति सिद्धान्तप्रकटनपूर्वकं तद्विभागं दर्शयति । अथ इत्यधिकारार्थः । अतः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

परमुक्तिमतात् परम्परामुक्तिमतप्रकरणे तन्मते निष्कलोपास्त्यैव मुक्तिः सा च परा इति प्रतिपादनम्। प्रगुक्तपदमुक्तवादरीत्या सकलोपास्तितः प्राप्तपदमुक्तेर्विनाशित्वात्। तदुक्तं च -

अथातः शुद्धशैवोक्तकर्मावरणसंभवः।
परमुक्तिमतोऽयं च सङ्ग्रहेण निगद्यते॥ 565
पूर्वं सामान्यतः प्रोक्तं शुद्धशैवमते पुनः।
पूर्वोक्ते तु मते सर्वमङ्गीकृत्य यथोचितम्॥ 566
पतिः पशुश्च पाशश्च पदार्थस्त्रिविधो मतः।
पतिस्तत्र शिवः प्रोक्तो निष्कलो निर्मलः श्रुतः॥ 567
अप्रमेयमनिर्देश्यमनौपम्यमनामयम्।
सूक्ष्मं सर्वगतं नित्यं ध्रुवमव्ययमीश्वरम्॥ 568
अप्रमेयमनन्तत्वादनिर्देश्यमलक्ष्यतः। 569A
अनौपम्यमसादृश्याद्विमलत्वादनामयम्।
सूक्ष्मं चानुपलभ्यत्वाद्व्यापकत्वाच्च सर्वगम्॥ 570
नित्यं कारणशून्यत्वादचलत्वाच्च तद्ध्रुवम्।
अव्ययं परिपूर्णत्वात्स्वामिभावात्तथेश्वरम्॥ 571
शिवतत्त्वमिदं प्रोक्तं सर्वाध्वोपरी संस्थितम्।
इत्यतः सकलत्वादि निरस्तं प्रागुदीरितम्॥ 572
शिवस्य निष्कलस्यास्य कर्तृत्वमपि युज्यते।
सृष्ट्यादावात्मनो देहचेष्टायां युज्यते यथा॥ 573
अतो हि श्रूयते स्पष्टं मृगेन्द्रादौ तथैव च।
अथानादिमलापेतः सर्वकृत्सर्वविच्छवः॥ 574
पूर्वव्यत्यासितस्याणोः पाशजालमपोहति।
करणं च न शक्तयन्यच्छक्तिर्नाचेतनान्वितः॥ 575
विषया नियमादेकं बोधकृत्ये च तत्तथा।
लोके वपुष्मतो दृष्टं कृत्यं स्यादस्मदादिवत्॥ 576
मूलाद्यसम्भवाच्छाक्तं वपुर्नो तादृशं विभोः।
तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः॥ 577
ईशतत्पुरुषाधोर वामाजैर्मस्तकादिकम्।
यथा कालो ह्यमूर्तोऽपि दृश्यते फलसाधकः॥ 578

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

एवं शिवो ह्यमूर्तोऽपि कुरुते कार्यमिच्छया।
सृष्टयर्थं सर्वतत्वानां लोकस्योत्पत्तिकारणम्॥ 579
योगिनामुपकाराय स्वेच्छया गृहचते तनुम्।
इत्यस्य सकलत्वेऽपि कश्चिद दोषो न विद्यते॥ 580
पशुरात्मा विभुर्नित्यः सकलः प्रलयाकलः।
विज्ञानाकल इत्येव त्रिविधः स्यात्तथागमः॥ 581
आत्मनो व्यापिनोऽनन्ताश्चिद्रूपाः पशवस्त्रिधा।
सकलाकलभेदेन एकद्वित्रिमलाः क्रमात्॥ 582
मायाकर्ममलच्छन्नः सकलः सोऽभिधीयते।
सृष्टौ कलादियोगा ये तथैते सकला मताः॥ 583
मलकर्मावृतो यस्तु स भवेत्प्रलयाकलः।
मलैकबन्धसम्बन्धो विज्ञानाकलः पशुः॥ 584
आथात्मनां विभुत्वं च पौष्करादिषु विस्तृतम्।
व्यापकत्वे हचणौ सिद्धचद्धर्मव्यापकता भवेत्॥ 585
अन्यत्रानुपलब्धस्य देहाद्वचापकता कुतः॥ 586A
ईश्वरः-
न देहपरिमाणत्वमणूनामुपपद्यते।
तस्य देहाद्बहिर्देशे स्थितार्थग्राह्कत्वतः॥ 587
किञ्चाभिव्यञ्जको यत्र यत्र देहेन्द्रियादिकम्।
तत्र सर्वत्र तत्कार्यदृष्टेर्व्यापकतात्मनः॥ 588
व्यापकोऽयममूर्त्तत्वाद्याथा व्योम ततस्तथा।
तद्धर्मभूतं ज्ञानं च व्यापकं विषयोन्मुखम्॥ 589
इत्यादि बहुधा स्पष्टं साधितं तत्तथा सति।
पुर्यष्टकसमायोगादवस्थादिश्च युज्यते॥ 590
पाशाः पञ्चविधा ज्ञेयाः प्रागुक्तेनैव वर्त्मना।
तच्छुद्धाध्वपदप्राप्तिरपि बन्ध इति स्मृतः॥ 591
मलश्चास्ति पशूनां तत्सद्भावे श्रूयते श्रुतिः।
आत्माऽन्तः करणादन्योप्यन्वितो मन्त्रिभूपवत्।
अवस्थापञ्चकस्योऽतो मलबद्धस्वदृक्क्रियः॥ 592
तदेकं सर्वभूतानामनादि निबिडं महत्॥ 593

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्रत्यात्मस्थस्वकालान्तोपाधिशक्तिसमूहवत्।
इत्येवं पाशबद्धस्य कुतश्चित्कारणादणोः॥ 594
संप्राप्तशिवपुण्येन कर्मसाम्यस्य सम्भवे।
मलपाकेन सार्धं तद् दीक्षा योग्यो भवेन्नरः॥ 595
दीक्षा तु योगमार्गोण न पुनः कर्मवर्त्मना॥ 596A
योगमार्गेण दीक्षायां पुनरष्टाङ्गयोगयुक्।
निष्कलोपासनं कृत्वा परमुक्तिमवाप्नुयात्॥ 597
न कर्तव्यं क्रियाजालं योगिनामिति च श्रुतिः।
बहिश्चित्तं निवार्यैव विन्दन्लोकेन सीदति॥ 598
यद्यद्यपेक्षया यस्तु कुरुते कर्म सञ्चयम्।
तद्गतिर्जायते तस्मान्निराकारं विचिन्तयेत्॥ 599
व्योमाकारं महाशून्यं व्यापकं यो न भावयेत्।
संसारी स भवेल्लोके बीजकोशक्रिमिर्यथा॥ 600
आत्मस्थं यः शिवंत्यक्त्वा बहिष्टं यजते शिवम्।
हस्तस्तं पिण्डमुत्सृज्य लिहेत्कूर्परमात्मनः॥ 601
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः।
अज्ञानां भावनार्थाय प्रतिमा परिकल्पिता॥ 602
इति सामान्यतः प्रोक्तः परमुक्तिमतस्तिवह।
विशिष्योपरि वक्ष्यामस्तत्तद्वादानुसारतः॥ 603

26. ईश्वरऐक्यसिद्धान्तः

तत्रेश्वरैक्यसिद्धान्ते त्वङ्गीकृत्य यथोचितम्।
प्रागुकतं परकैवल्यं शिवेनैक्यमितीरितम्॥ 604

इत्ययं किं प्रतिपादयति? शुद्धशैवभेदकर्मावरणसिद्धान्त सिद्धपरमुक्तिपादे प्रागुद्दिष्टक्रमेण प्रथममीश्वरैक्यवादं दर्शयति। अथात्र ईश्वरैक्यवादे प्रागुक्तपरमुक्तिसामान्योक्तेषु यथोचितमुपगमकथनं आणवमलादेरभ्युपगमात्। तदुक्तं च -

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अथेश्वरैक्यवादस्तु संग्रहेण निगद्यते।
पूर्वं सामान्यतः प्रोक्तमङ्गीकृत्य यथोचितम्।। 605
अनादिनिर्मलस्त्वीशस्तद्वदात्मा च निर्मलः।
नायं तद्वज्जगत्कर्ता यदेवं श्रूयते श्रुतिः।। 606
शिववच्छाश्वतः शुद्धः सृष्टिधर्मविवर्जितः।
पाशाश्चतुर्विधा ज्ञेया नत्वाणवमलो मतः।। 607
मायैव सहजत्वेन रुणद्धि पशुदृक्क्रिये।
किमन्येनाणनेनैवं श्रूयते हि शिवागमे।। 608
माया कम्बुकवज्ज्ञेया तुषवच्च कलादिकम्।
शिवेच्छाविधिसंसिद्धौ मायैव सहजो मलः।। 609
रुणद्धि पुरुषं माया साऽनादिभववासना।
मायाच्छादितचैतन्यः सः तन्त्रेऽस्मिंश्च निर्मलः।। 610
तस्मान्मोहादयश्चास्या मायायास्तु गुणा मताः।
नत्वाणवमलत्यैव सुप्रभेदे हि ते श्रुताः।। 611
मोहो मदश्च रागश्च विषादश्चैव शोषितम्।
हर्षको हि च वैचित्र्यं सप्तैते सहजा मलाः।। 612
तदेवं पुरुषोऽनादिनिर्मलः स्यात्तथापि सः।
बद्धः शुद्धैरशुद्धैश्च मायाकायैः शिवेच्छया।। 613
आर्जितैः पुण्यपापैश्च तत्कर्मानुगुणः पशुः।
कदाचित्कर्मसाम्ये च शक्तिपाते च सम्भवे।। 614
मुमुक्षुर्नैष्टिकाचार्यज्ञानदीक्षादिदीक्षितः।
सदुपायात्तदुद्दिष्टान्मुक्त एव न संशयः।। 615

इति अथात्र परमुक्तेः शिवेनैक्यप्राप्तिकथनं ततोऽन्यथापद
प्राप्तिकथने तदुपरितनभावेन तत्प्राप्तिकामनानन्तरयोगतः संपूर्णमनोरथाभावात्, तत्कर्मक्षये विनश्वरत्वात्, देहसद्भावेन बन्धनिवृत्यभावाच्च। तदुक्तं च-

शिवेनैक्यं तु कैवल्यमैक्यं शैवमते नृणाम्।
निष्कलोपासनादेव तत्प्राप्तिश्च श्रुतागमे।। 616

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शिवं परमकल्याणं निष्कलं निर्मलं प्रभुम्। 617A
चिदानन्दमयं नित्यं तेजोरूपं विचिन्तयेत्।
पशुभावं परित्यज्य शिवोऽहमिति भावयेत्॥ 618
विज्ञप्तिमात्रो हि सदा विशुद्धः सर्वत्र यस्मात्सततं विमुक्तः।
नादेयहेयोऽप्ययमप्रतर्क्यस्तिष्ठन्सदा ब्रह्ममयो विशोकः॥ 619
इत्यादि वचनात्तत्र तथा मुक्तिश्च विश्रुता।
यथार्कद्युतिरभ्रेषु तथा पाशेष्विहात्मचित्॥ 620
मग्ना मुह्यति कालेन तदपाये तु भासते।
शिवे संयोजितं रुपं सायुज्यमिति कथ्यते॥ 621
ज्ञानात्सायुज्यं एवं तु तोये तोयं यथा तथा।
शिवेनैक्यं गतः सिद्धस्तदधीनस्ववृत्तिकः॥ 622
मलमायाद्यसंसृषटौ भवति स्वानुभूतिमान्।
इत्येवं न पदप्राप्तिर्मुक्तिः सा तु विनश्वरा॥ 623
तदेवमैक्यशैवस्तु कथितः संग्रहादिह। 624A

27. पाषाणवादम्

पाषाणवादिसिद्धान्ते मुक्तिः पाषाणवत्स्थितिः।
भेदवादिमते मुक्तिः नृणां निर्मलता मता॥ 625

इत्ययं किं प्रतिपादयति? पाषाणभेदवादो दर्शयति। अत्र पाषाण शैवमते त्वीश्वरैक्यवादोक्तेषु यथोचितमङ्गीकृत्य पाषाणवत्स्थिति रेव मुक्तिरिति प्रतिपादनम्। आणवमलमुपगम्य तस्यानादित्वेन विनाशायोगात्तदुक्तपरमेश्वरैक्यासंभवात्। तदुक्तंच।

पाषाणशैवसिद्धान्तः सङ्ग्रहेण निगद्यते।
ऐक्यशैवोक्तसिद्धान्ते त्वङ्गीकृत्य यथोचितम्॥ 626
पतिरनादिमुक्तः स्यान्न तथा पशुरुच्यते।
पञ्चपाशेन बद्धत्वात्समलः स्यात्तथाऽगमः॥ 627
मलः कर्म च माया च शक्तिश्चैव तिरोधिका।
बिन्दुश्च पञ्च पाशाः स्युयैरेवं बध्यते पशुः॥ 628

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तन्मायाव्यतिरिक्ताणोर्मलश्च सहजः श्रुतः।
सहजोऽणोर्मलो माया कार्यमागमिको मलः ॥ 629
माया नो मोहिनी प्रोक्ता स्वतः कार्यात्प्रकाशिका।
यतः क्रमेण संश्लिष्टा चैतन्यद्योतिकात्मनः ॥ 630
मलं विदार्य चिद्वचक्तिरेकदेशो भवत्यणोः।
चितेश्चित्सहजो धर्मः स चानादिमलावृतः ॥ 631
ताम्रकालिकवद्योगात्सहजः समुदाहृतः।
इत्यतो मलधर्माःस्युः प्रोक्ता मोहादयोऽपि च ॥ 632

तथा च प्रागुदाहृतवचनस्यैवमूह्यताम् -
माया कम्बुकवच्चेति न रुग्वच्छक्तिरोधकम् ॥ 633
प्रत्यक्केवलानां तु नृणां प्रलयकालतः
शक्तिस्वरूपमात्रेण मायायाः समवस्थितेः।
तदन्तर्गतभावेन तथात्मुपपद्यतेः ॥ 634
यदुक्तं तु ततः पश्चात्तुषवच्च कलादिकम्।
इत्येतद्वचनं पूर्वकर्मविषयभोगतः ॥ 635
कला(दि) कञ्चुकसम्बन्धस्तुषावत्स्यादिति स्थितम्।
शिवेछाविधिसंसिद्धौ मायैव सहजो मलः ॥ 636
इत्यत्र परमेशेच्छा विधिः कर्म तथा सति।
तत्कर्मभोगसिद्धं न मायैव सहकारिणी ॥ 637
स्वकार्यद्वारतः सेति सहजत्वं न चान्यथा।
रुणद्धि पुरुषं माया याऽनादिभववासना ॥ 638
मायाच्छादितचैतन्यमित्यत्राप्येवमुच्यते।
भोगद्वारेण भिथ्याधीरयथार्थे यथार्थवत् ॥ 639
यया नृणां भवेदेव जनिकेति तथा श्रुता।
मायापि मोहिनी प्रोक्ता विषयास्वादभोगतः ॥ 640
असत्यं सत्यतां याति यावन्नो विन्दते परम्।
इत्येतेऽपि तदेवं हि मायायाः पृथगाणवः ॥ 641
तेनायं समलो जीवः जीवप्रेर्यस्तथागमः।
पशून् पाशांश्च मुक्ताणून् पातीति पतिरुच्यते ॥ 642

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तदेवं बद्धजीवात्मा कर्मसाम्यादिसम्भवे।
मुमुक्षुः साधको विद्वान् संप्राप्य ज्ञानदेशिकम्॥ 643
ज्ञानदीक्षां लभेत्सा च शास्त्रदीक्षा न चान्यथा।
क्रियादीक्षा प्रबद्धानां ज्ञानदीक्षा मनीषिणाम्॥ 644
उच्यते ज्ञानदीक्षां तां न विना पाशमोचनम्।
इत्येवं कामिकोक्तेन शास्त्रदीक्षा च सा श्रुता॥ 645
शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता।
न त्वन्या ज्ञानदीक्षा सा क्वचिदेवं हि विश्रुता॥ 646
विनेज्यानलकर्मादि मनोव्यापारमात्रतः।
दीक्षा ज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधजा॥ 647
इत्येषा च क्रियादीक्षा मनोव्यापारसम्भवा।
ततः कर्म परित्यज्य ज्ञानाचार्यमुखात्स्फुटम्॥ 648
ज्ञानं प्राप्य भवेन्मुक्तो नान्यथेति तथागमः।
ज्ञानेनैव तु कैवल्यं प्राप्तं तत्र न संशयः॥ 649
संसारबीजमज्ञानं संसार्यज्ञस्ततः स्मृतः।
ज्ञानात्तस्य निवृत्तिः स्यात्प्रकाशात्तमसो यथा॥ 650
शिवज्ञानात्परं ज्ञानं तत्समं च न विद्यते।
वेदपाठाद् दिवं याति मन्वन्तरशतं पुनः॥ 651
शिवागमपरिज्ञानाच्छिवसायुज्यमेष्यति।
नास्ति ज्ञानसमो योगो नास्ति ज्ञानसमं व्रतम्॥ 652
नास्ति ज्ञानसमा चर्या नास्ति ज्ञानसमा क्रिया।
नास्ति ज्ञानसमं तीर्थं नास्ति ज्ञानसमं तपः॥ 653
नास्ति ज्ञानसमो यज्ञः तस्माज्ज्ञानं विशिष्यते।
इत्येवं शैवसिद्धान्ते श्रूयते वैदिके पुनः॥ 654
आत्मनः परमा मुक्तिर्ज्ञानेनैव न कर्मणा।
ज्ञानादेव हि कैवल्यं नान्यथा कर्मकोटिभिः॥ 655
अतो हि ज्ञानवानेव गुरुः स्यादिति च श्रुतिः।
सर्वलक्षणहिनोऽपि ज्ञानवान्गुरुरिष्यते॥ 656

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इत्येतच्च गुरोः शम्भोः प्रसादाच्चेति विश्रुतम्।
यच्च शम्भोः प्रसादेन गुरोश्चैव प्रसादतः ॥ 657
जायते तच्छिवज्ञानं नान्यथा सत्यमीरितम्।
गुरोरनुज्ञां संप्राप्य पठेद्दिव्यागमं शिवे ॥ 658
गुरुवक्त्रेण बोद्धव्यं गुरुसेवापरायणैः।
दीक्षितानां तु विप्राणां न पापं वेदपाठनम् ॥ 659
अदीक्षितानां विप्राणां शिवागमविलोकनम्।
पापमेतन्महादेवि सत्यमेतन्न संशयः ॥ 660
इत्यदीक्षितपुंसां तु ज्ञानाभ्यासः कथं भवेत्।
इति चेन्न तथा प्रोक्तः प्रबुद्धान्प्रति च स्मृतम् ॥ 661
न शम्भुगुरुभक्तानां विदुषां वा तथागमः।
व्याकुर्याञ्छिवभक्तेभ्यः तन्त्रार्थं गतमत्सरः ॥ 662
न्यायतो न्यायवर्तिभ्यः पालयन्गुरुसन्ततिम्।
अन्यथा तु मतङ्गादेर्मतङ्गाद्यवबोधनम् ॥ 663
अदीक्षितस्य देवेशः कृतवानिति तत्कथम्।
तदेवं ज्ञानतः प्राप्य मुक्तिः पाषाणवत्स्थितिः ॥ 664
न चैषा योगतो वाथ दीक्षया वा ततोऽन्यथा।
आगन्तुकमलापाये नापायः सहजस्य तु ॥ 665
नृणामनादिसिद्धस्यानागन्तुकमलस्य वै।
ततो मायादिसंजातसर्वावस्था विवर्जिता ॥ 666
सुखदुःखादिविज्ञानविकल्परहिता पुनः।
मलमात्रेण संयुक्ता मुक्तिः पाषाणवत्स्थितिः ॥ 667
शिवत्वप्राप्तिरेषैव नान्यथेति तथागमः।
मनोवस्थाविनिर्मुक्तं विज्ञेयं मुक्तिलक्षणम् ॥ 668
अन्यथेशात्मनोरैक्ये दूष्यमेकात्मवादवत्। 669A

28. भेदशैवम्

अथात्र भेदशैवमते पाषाणशैवमतोक्तेषु यथोचितमङ्गीकृत्य निर्मलता मुक्तिप्रतिपादनमाणवस्यापि मलस्य विश्लेषयोगेन नृणां सर्वमलापाय एव शिवत्वप्राप्तिः परमोक्ष इत्ययुपगमात्। तदुक्तंच -

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

भेदशैवस्य सिद्धान्तः संग्रहेण निगद्यते।
पाषाणशैवसिद्धान्तमङ्गीकृत्य यथोचितम्॥ 670
पत्यादयः पदार्थास्ते भिन्ना एव परस्परम्।
अन्यथा तु पदार्थानां स्वरुपं च न सिध्यति॥ 671
तेषां पृथक्तया प्रोक्ततत्तल्लक्षणमप्यथ।
तत्र यः पशुरित्युक्त आणवादिसमावृतः॥ 672
कुतनिष्कारणात्तस्य मलपाकादिसम्भवे।
शिवशक्तिनिपाते च कृपया परमेश्वरः॥ 673
आचार्यमूर्तिमास्थाय दीक्षया मोक्षदो भवेत्।
नतु ज्ञानेन योगादिनाप्येवमागमे श्रुतम्॥ 674
अथात्मा समलो बद्धः पुनर्मुक्तश्च दीक्षया।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि॥ 675
ज्ञानतो योगतश्चैव चर्यातश्च न मुच्यते।
दीक्षया तु भवेन्मुक्तिः सर्वेषां प्राणिनामिह॥ 676
मन्दशक्तिनिपातानां कर्तव्यं च विधीयते।
दीक्षितानां ततोऽन्येषां सद्योमुक्तिस्तु विश्रुता॥ 677
एका निर्वाणदा सद्यो द्वितीया देहपाततः।
प्रारब्धसञ्चितागामि कर्मजालं विशोध्यते॥ 678
यदात्यन्तविरक्तानां सद्यो निर्वाणदा भवेत्।
तदेव दीक्षया मुक्तिरत्र शैवविनिश्चिता॥ 679
ज्ञानं तु बुद्धिनिष्ठस्य अज्ञाननाशपुरःसरम्।
कर्मक्षयकरं नात्मनिष्ठाज्ञाननिवर्तकम्॥ 680
तस्मान्न परमुक्तौ तत्साधनं हि तथा वचः॥ 681A
विज्ञानयोगसन्यासैः भोगाद्वा कर्मणः क्षयात्।
इत्यादि वचनं किञ्च वैदिके हि तथा श्रुतम्॥ 682
परोक्षब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम्।
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्॥ 683
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन।
योगादिश्च पदप्राप्तौ साधनं न तु मुक्तितः॥ 684

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दीक्षया मलनाशो हि नान्यथेति विनिश्चयात्।
मलस्य द्रव्यरूपत्वात्तदपायस्तु दीक्षया॥ 685
चक्षुषः पटलापायो भिषग्व्यापारतो यथा।
न तु ज्ञानेन तेनेति क्वचित्तु प्रतिपादनम्॥ 686
मन्दादिशक्तिपातानां तथा दीक्षापुरः सरम्।
ज्ञानाभ्यासेन कालेन मुक्तिरेवेति तत्परम्॥ 687
वैदिकोक्तं त्वविद्या या अभावत्वेन सम्मतात्।
ज्ञानादेव तु कैवल्यमित्येतदुचितं पुनः॥ 688
तथा न शोचते शैवे प्रागुक्तेनैव वर्त्मना।
यदुक्तं ज्ञानदीक्षा तु शास्त्रदीक्षेति तन्न च॥ 689
दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्वावबोधजा।
इत्येवं शास्त्रदीक्षायाः पृथक्त्वेन श्रुतं यतः॥ 690
सा दीक्षा हि क्रियाशक्तिः शिवस्य परमात्मनः।
तया विना कुतो मुक्तौ साधनं किञ्चिदिष्ते॥ 691
ज्ञानं स्याच्छास्त्रदीक्षेति यदुक्तं तन्न युज्यते।
श्रवणादि क्रियामूलं शास्त्रज्ञानं हि यत्स्फुटम्॥ 692
ततस्तथाविधेनैव कर्मणा न विनागतिः॥ 693A
अथायं तु मतङ्गादिर्विना दीक्षां महेश्वरात्।
प्राप्तवानागमज्ञानमित्युक्तं च न युज्यते॥ 694
महेशेन यदा दृष्टो मतङ्गो दीक्षितस्तदा।
चक्षुरुन्मील्य यत्तत्वं ध्यात्वा शिष्यं समीक्षते॥ 695
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत्।
इत्यतो ध्येयतत्वं हि भगवान् परमेश्वरः॥ 696
अदीक्षितस्य सिद्धान्तश्रवणादौ विधिस्तु न। 697A
त्वदुक्तौ न्यायवर्तिभ्य इति तत्र विशेषणात्।
न्यायवर्तिन एतेऽत्र शिवदीक्षानुवर्तिनः॥ 698
तदेवं परमोक्षादौ दीक्षैव मुख्यसाधनम्।
अतो दीक्षाविशेषेण शैवे हृचेवं च विश्रुतम्॥ 699

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दीक्षितः शिवजातिः स्यादन्यजातिर्न विद्यते।
पुत्रकाणां साधकानां तथा समयिनामपि॥ 700
प्राक्जात्युदीषणा ..... शो भवेत्॥
दिनत्रयं तु रुद्रस्य पञ्चाहं केशवस्य तु।
पितामहस्य पक्षैकं नरके पच्यते तु सः॥ 701
अनुपनीतः प्रथमो द्वितीयोप्युपनीतकः।
वेदाध्यायी तृतीयः स्यादग्निहोत्री चतुर्थकः॥ 702
यज्ञयाजी च तत्रैव पञ्चमश्च प्रकीर्तितः।
सत्रयाजी तु षष्टः स्याद्वेदान्ती सप्तमः स्मृतः॥ 703
उत्तरोत्तरतश्चैते श्रेष्ठा वृत्त्या सहस्रकम्।
मुख्यं वेदान्तविदुषः कोटिश्रेष्ठं च मत्प्रियः॥ 704
भक्त्या भजति मामेव सर्वजातिषु तत्र वै।
सर्वेषां दीक्षितानां तु सदृशं नास्ति लौकिके॥ 705
यथा शिवस्तथा भक्तो यथा भक्तस्तथा शिवः।
तस्मात्सर्वप्रयत्नेन दीक्षितानां च भोजनम्॥ 706
भोगमोक्षप्रदानत्वात्कारणं च मम प्रियम्।
तपो विद्याधिकस्यापि कर्तव्यं नाभिवादनम्॥ 707
तदेवं दीक्षया मुक्तिर्मलनाशपुरः सरम्।
आणवः सहजः सिद्धः जीवस्यानादिसम्भवः॥ 708
मुक्तौ च तदपायश्च मुच्यते हि तथागमः।
अथात्मा समलो बद्धः पुनर्मुक्तश्च दीक्षया॥ 709
विषापहारं कुरुते ध्यानबीजबलैर्यथा।
कुरुते पाशविश्लेषं तथाचार्यशिवाध्वरैः॥ 710
मन्त्रौषधबलैर्यद्वत् सन्निरोधो विषस्य तु। 711A
तथाहि सर्वपाशानां सन्निरोधस्तु दीक्षया।
तदाणवस्य विश्लेषो न युक्त इति नोच्यते॥ 712
अथास्य सहजस्याणोरुच्छेदे चेतनस्य च।
उच्छेदस्पटिकस्येव दोषः स्यात्कर्षणादितः॥ 713

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इति चेन्न निरुपे तु रूपदृष्टान्तदोषतः ।
अथवा कालिमायास्तु विश्लेषे सति ताम्रगः ।। 714
न स्वरूपविनाशश्च तथात्रैवं शिवागमः ।
सहजा कालिमा ताम्रे तत्क्षयान्न च तत्क्षयः ।। 715
यथा ताम्रस्य तद्वत्स्यादेवं पुंसो मलक्षयः ।
रसविद्धं यथा ताम्रं हेमत्वं प्रतिपद्यते ।। 716
तथा विज्ञानसम्बन्धाच्छिवत्वं प्रतिपद्यते ।
मलापायस्तु तच्छक्तिनिरोधो हि तथागमः ।। 717
अग्नेस्तु दाहिका शक्तिर्मन्त्रैराशु निरुध्यते ।
तद्वच्छक्तिसंरोधाद्विभक्तेत्यभिशब्द्यते ।। 718
अनेनापि विरोधो न तदपाये तु निर्मलः ।
आत्मा मुक्तः स एवायं न मुक्तः समलो मतः ।। 719
मनोवस्थाविनिर्मुक्तं विज्ञेयं मुक्तिलक्षणम् ।
इत्येवं मुक्त्युपायानामनुष्ठानप्रवर्त्तकम् ।। 720
देवीकालोत्तरे किन्तु श्रूयते मुक्तिलक्षणम् ।
मलैर्मुक्तस्तथात्मा तु मुक्त इत्युच्यते बुधैः ।। 721
इत्येवं सुप्रभेदादौ शिवेन प्रतिपादितम् ।
ततो निर्मलतो मुक्तिर्भेदवादे व्यवस्थिता ।। 722

29. समवादम्

अथायं समवादस्तु संग्रहेण निरस्यते ।
पूर्वोक्तवादसंसिद्धमङ्गीकृत्य यथोचितम् ।। 723
न दीक्षामात्रतो मुक्तिः किन्तु ज्ञानादिनापि वा ।
शैव पूजाद्यनुष्ठाने योग्यता जनका हि सा ।। 724
अन्यथा दीक्षितस्यात्र कर्तव्यं कथमुच्यते ।
विधानत्वेन चर्यादि स्वदीक्षोत्तरकालतः ।। 725
दीक्षितानां क्रमेणैव सदाचारोनिगद्यते ।
नित्यादि कर्म कर्तव्यं शिवमार्गस्थितेषु च ।। 726

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तेषां साधारणं कर्म कार्यं सर्वात्मना मतम्।
नित्यादि त्रितयं कार्यं चतुर्भिरविचारतः ।। 727
वैश्वदेवं तथा सन्ध्यां शूद्रस्त्यक्त्वा त्रयीमयीम्।
इत्यादि वचनादुक्त आचारस्तु विरुध्यते ।। 728
न देहपातदीक्षा तु मुक्तिदा कर्मणा विना।
प्रागनुष्ठित ....
स्यादत्यन्तविरक्तानामिति तद्विधितः स्फुटम् ।। 729
ततो दीक्षाविरुद्धस्य ज्ञानयोगादितो गतिः।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि ।। 730
ज्ञानतो योगतश्चैव चर्यातश्च मुच्यते।
इत्यादि वचनं दीक्षास्तुतिरित्येव सम्मतम् ।। 731
तद्दीक्षा ज्ञानयोगादेर्मुक्तिः शैवागमोदिता।
न सा निर्मलतामात्राणूनां पाषाणवत्स्थितिः ।। 732
न किञ्चिज्ज्ञानमप्यस्य भवावस्थापरं ततः ।।? 733A
परमः पुरुषार्थो हि मोक्ष एवेति सम्मतः।
सतु मुक्तस्य यज्ज्ञानं पशुपाशादि वस्तुषु ।। 734
स देशस्येव सर्वेषु यः सपूर्णमनोरथः।
ज्ञानस्य शिववित्तिसिद्धैः क्रियाया निर्मलस्य च ।। 735
षाड्गुण्यस्य च तज्ज्ञानं क्रियामूलस्य सम्भवात्।
तथा च शिववन्मुक्तः षट्गुणाढ्य इति श्रुतः ।। 736
ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते।
न तेषां पुनरावृत्तिर्घोरे संसारसागरे ।। 737
सर्वज्ञाः सर्वगाः सिद्धा इत्येवं आगमः पुनः ।। 738
अप्रमेयगुणोपेतः सर्वज्ञः खलु सर्वदा। 739A
सर्वकृत्सर्वलोकेशः शिवतुल्यः प्रजायते।
इति निश्वासके किञ्च शिवधर्मोत्तरादिषु ।। 740
सर्वज्ञः परिपूर्णश्च शुद्धः सर्वगतः प्रभुः।
संसारसागरान्मुक्तः शिवतुल्यः प्रजायते ।। 741

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहः स शिवत्वमेति ।। 742
इति षाड्गुण्यसंप्राप्तिः परमोक्ष इति स्मृतः ।
तेनायं शिववन्मुक्तो राजते हि न चान्यथा ।। 743
मुक्तिः प्रागुक्तरीत्यास्य निर्मलत्वं च केवलम् ।
मलैर्मुक्तस्तदात्मा तु मुक्त इत्युच्यते बुधैः ।। 744
इत्येवं सुप्रभेदादेस्तात्पर्यमिदमिष्यते ।
तथा निर्मलतायां तु षाड्गुण्यं च भवेदिति ।। 745
एवं सामान्यतः प्रोक्तः सदाशिवसमो मतः । 746A

30. कौशिकम्

अथ कौशिकसिद्धान्तः समावेश इति श्रुतः ।
महीपतिर्ऋषिः प्रोक्तः पूर्ववक्त्रेण दीक्षितः ।। 747
अंशुमादिकवीरान्तं पुरुषेणोद्भवं भवेत् ।
इत्येवं वचनात् पश्चात् समावेशस्तु कौशिकः ।। 748
तदावेशेन साम्यं तु संग्रहेण निरूप्यते ।
अप्रमेयगुणोपेतः सर्वज्ञः खलु सर्वदा ।। 749
सर्वकृत्सर्वलोकेशः शिवतुल्यः प्रजायते ।
इत्यागमेषु मुक्तस्य श्रूयते शिवतुल्यता ।। 750
सा तु योगानुसारेण सायुज्याणोः शिवेन बै ।
मुक्तौ शिवसमावेशाच्छिव धर्माविभासतः ।। 751
तथा मुक्तस्य लोकेऽपि ग्रहाविष्टस्यनुर्यथा ।।
.... दृश्यते ग्रहतुल्यता ।
अन्यथा भवकालेऽपि षड्गुणाढ्यो भवेत्पुमान् ।। 752
तथाभिप्रायतश्चैव श्रूयते हि शिवागमे ।
यथा भेषजसामर्थ्यादशक्तानां बलं परम् ।। 753
तेन तच्छक्तियोगेन सामर्थ्यममितं भवेत् ।
एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ।। 754

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ।
इत्येवमत्रवायव्यसंहितायां च विश्रुतम् ।। 755
अयस्यग्नौ समाविष्टे दाहोऽग्नेरेव नायसः ।
मूर्त्यात्मस्वेवमैश्वर्यमीशस्यैव न चात्मनाम् ।। 756
तत एव जगत्यस्मिन्काष्ठपाषाणमृत्स्वपि ।
शिवावेशवशादेव शिवत्वमुपचर्यते ।। 757
अतो हि बन्धकाले च नृणां करणयोगतः ।
अयसाग्नेर्यथा योगे वियोगोऽग्नेर्यथाऽयसा ।। 758
तत्वैस्तदात्मनश्चैव शक्त्या कर्मवशाद्भवेत् ।
अथावेशवशादेव तत्तद्धर्मान्वितो यदि ।। 759
न चात्मा जड एव स्यादिति शङ्का न विद्यते ।
आत्मासौ चेतनो यस्मादाविष्टस्तेन तेन च ।। 760
ग्रहेणाविष्ट पुरुष इव वेत्ति करोति च ।
इत्यावेशेन साम्यं तु संग्रहेण समीरितम् ।। 761

31. भारद्वाजम्

उत्पत्तिसमतापक्षो भरद्वाजमतः श्रुतः ।
भारद्वाजं समुद्भूतमिति प्रागुक्ततः पुनः ।। 762
शर्वोक्तादिकसिद्धान्तं वातुलान्तमिति स्मृतम् ।
सद्योजातमुखोत्पन्नं भारद्वाजमृषिं तथा ।। 763
सूत्रमार्गेण सञ्चिन्त्य सद्योजातं तु दीक्षितम् ।
इत्यत्रोत्पत्तितः साम्यं मुक्तिरेव न चान्यथा ।। 764
प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत् ।
एतत्समाधिमुत्कृष्टं प्रशंसन्ति मनीषिणः ।। 765
शिवमेव स्वयं भाव्यं शिवमेव स्वयं भवेत् ।
इत्यादि शिवयोगेन ततोऽन्येन च यत्फलम् ।। 766
श्रूयते शिवसाम्यं यदुक्तौ मुक्तात्मनामिह ।
तदपूर्वतया त्वेषा जायते परमार्थतः ।। 767

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शिवात्सर्वज्ञतामुख्य धर्मोत्पत्तिपरस्परम् ।
जीवन्मुक्तस्तु तद्विद्वान् पूर्वोपाधिगुणान् त्यजेत् ।। 768
स सच्चिदादिधर्मित्वं भजेद् भ्रमरकीटवत् ।
इत्यनेनापि तत्स्पष्टं तथाचैव शिवागमे ।। 769
संसारसागरान्मुक्तः प्रयोगेण तथा मतः ।। 770A
न त्वावेशवशात्तत्वं तथात्वे शिवधर्मतः ।
मुक्तस्य भासमानानां परधर्मावलम्बतः ।। 771
पुरुषार्थो न मुक्तस्य स्वसंपूर्णमनोरथः ।
अतो बन्धदशायां च तत्तद्गुणविनाभवः ।। 772
नृणां ज्ञानं न लीनं तु कला कालादिभिः स्फुटम् ।
अन्यथा तु कुतः कर्म भोगवैचित्र्यसंभवः ।। 773
प्रागुक्तवचनं सर्वमेतदर्थानुसारतः ।
युक्तमित्थं समुद्भूतसाम्यवादः समीरितः ।। 774

32. आगस्त्यम्

अथाभिव्यक्तिसाम्यं तु संग्रहेण निरूप्यते ।
पूर्वोक्तैश्वर्य भेदेषु चाङ्गीकृत्य यथोचितम् ।। 775
अगस्त्य एतत्सिद्धान्तवादीति श्रूयते श्रूतौ ।
आगस्त्यमभिव्यक्तं तु चानादिस्तु परं स्मृतम् ।। 776
बिम्बादिकं तु सिद्धान्तं वामदेवोद्भवं तथा ।
ब्राह्मणर्षिरगस्त्यः स्याद्वामवक्त्रेण दीक्षितः ।। 777
इति साम्यश्रुतेर्मुक्तौ मुक्तस्य शिवतुल्यता ।
कल्प्या सा च समुत्पत्तिक्रमेण न हि सम्भवेत् ।। 778
उत्पत्त्या सिद्धधर्मस्तु मुक्तस्य हि विनश्यति ।
मुक्तावपूर्वभावेन समुत्पन्नतया स्फुटम् ।। 779
किन्त्वभिव्यक्रिमात्रेण यदेवं श्रूयते श्रुतौ ।
षाड्गुण्यव्यक्तये तेन स्रुवेणाज्याहुतिस्तु षट् ।। 780

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इति निर्वाणदीक्षोक्तविधिमार्गानुसारतः।
व्यक्तोऽसौ शिववद्भाति शिव एव तनुक्षये।। 781
सर्वज्ञः स शिवो यद्वत्किञ्चिज्ज्ञत्वविवर्जितः।
शिवत्वव्यक्तिसंपूर्णः संसारी न पुनस्तदा।। 782
इति मुक्तौ च तद्वद्व्यक्तिसाम्यमेवेति निशिचतम्।
पूर्वत्रोक्तागमार्थश्च स एवाभ्युपपद्यते।। 783
अतो हि गुरुभिश्चापि तथैव प्रतिपाद्यते।
दृष्टा नैनं हि मोहान्धैः सदेश्वरसमानता।। 784
समता च समुत्पत्तिसङ्घात्यावेशपक्षतः।
नाभिव्यक्तिः परा गीता बुद्धिवाचामगोचरा।। 785
तदेवं व्यक्तिसाम्यं तु यथान्यायं निरूप्यते।
सदसद्व्यक्तिवर्जितः सच्चिदानन्दरूपी यः।। 786
स एव सर्वगः सद्भिः ब्रह्मशब्देन शब्दितः।
इत्येवं श्रूयते शम्भोर्धर्ममाणां त्रितयं क्वचित्।। 787
साम्येऽत्र सत्वचित्वाभ्यां न विवादः शिवात्मनोः। 788A
आनन्दात्मतया त्वेतत्तयोर्निश्चीयते परम्।
उच्यमानोऽयमानन्दो यो धर्मश्चेतनात्मकः।। 789
क्रियाज्ञानसमृद्धिः स्यात्प्रकृत्यर्थानुसारतः।
समृद्धिः परिपूर्तिश्च व्याप्तिश्चाखण्डितेति च।। 790
तृप्तिश्चानन्दपर्याय इहैते सर्वतः समाः।
इत्थं सत्यतिरिक्तोऽर्थो रसो नास्माभिरिष्यते।। 791
इति रत्नत्रयादौ हि गुरुभिश्च निरूपितः।
वेदान्तैश्चतुराम्नायैस्तथान्यैः प्रतिपाद्यते।। 792
आनन्दविप्रलब्धानामानन्दोपहिता चितिः।
चिन्महोदधिगाम्भीर्यमवसीयेत सूरिभिः।। 793
ततः समाधिसंप्राप्तं यदिदं सुखमात्मनः।
शिवानन्दान्न किन्त्वेतदात्मशक्तेर्विजृम्भणम्।। 794
तदेतत्सच्चिदानन्दरूपीत्यादौ शिवागमे।
दृष्टस्यानन्दशब्दस्य समृद्ध्यर्थः स युज्यते।। 795

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तथा चास्ति हि चैतन्यसमृद्धिरिदमेतयोः ।
ततो मुक्तात्मशिवयोः साम्यमप्येतदक्षयम् ।। 796
अनेनाचिन्त्यविश्वादौ मुक्तिरूपोपपादके ।
ब्रह्मप्राप्त्यवधिस्तेन चात्मानन्दसुखं भवेत् ।। 797
शिवानन्दमनुप्राप्य चाविर्भावाय कल्पते ।
इत्येवमादि सूत्रेऽपि सोऽर्थःसमुपपाद्यते ।। 798
तदेवं सच्चिदानन्दधर्मसाम्यमितीरितम् ।
अथ सर्वज्ञकर्तृत्वधर्मतोऽप्यवधार्यताम् ।। 799
शिववत्सर्वकर्तृत्वे सर्वज्ञत्वे च सत्यपि ।
न करोति न जानाति भृशं मुह्यति बालवत् ।। 800
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा ।
सर्वज्ञः स शिवो यद्वत् किञ्चिज्ज्ञत्वविवर्जितः ।। 801
शिवत्वव्यक्तिसंपूर्णः संसारी न पुनस्तदा ।
इत्यादि श्रवणादीदृक् साम्यं च शिवमुक्तयोः ।। 802
प्रकारान्तरतः शास्त्रे षाड्गुण्यं प्रतिपाद्यते ।
यथा शिवे तथा जीवे मुक्तौ तदपि युज्यते ।। 803
सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहःस शिवत्वमेति ।। 804
इत्येवं श्रूयते यस्मात्सर्वज्ञानोत्तरागमे ।
एवं नानापथेनापि जीवात्मपरमात्मनोः ।। 805
अभिव्यक्तिमते मुक्तौ साम्यं सिद्ध्यति सर्वथा ।
ततश्च शिवपूजादौ नारुद्रो रुद्रमर्चयेत् ।। 806
इत्यतस्तत्समोऽर्हः स्यात् शिवोऽहंभावनादिभिः ।
प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत् ।। 807
शिवमेव स्वयं भाव्यं शिवमेव स्वयं भवेत् ।
समरसीभावयोगात्तत्समाधिरिहोच्यते ।। 808
व्योमाकारं महाशून्यं व्यापकं यो न भावयेत् ।
संसारी स भवेल्लोके बीजकोशक्रिमिर्यथा ।। 809

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

भुक्तिः स्वात्मनि संसिद्धं शिवत्वं भावयेत्सदा।
शिवत्वव्यक्तिरेवं स्यात्शिवसाम्यं तथा वचः ॥ 810
जीवन्मुक्तस्तु तद्विद्वान्सर्वोपाधिगुणान्त्यजेत्।
स सच्चिदादि धर्मित्वं भेजे भ्रमरकीटवत् ॥ 811
नान्य एवेत्युपायै (धे) श्च साम्यसिद्धिः प्रदृश्यते।

33. गौतमीयम्

शिवादाधिक्यवादजोऽयं गौतमीय इति स्मृतः।
अधिकं परमेशानादिति कैवल्यमुच्यते ॥ 812

इति सूत्रं किं प्रतिपादयति? शिवादाधिवचवादं दर्शयति। अत्र शिवादाधिक्यवादोऽयं गौतमीय इति श्रुतः इति कथम्? तदागमश्रवणात्। यदुक्तं प्राक् ''भारद्वाजं समुद्भूतं शिवादाधिक्यगौतमं'' इति। अथात्र शिवादाधिक्यमेव कैवल्यमिति प्रतिपादनं शिवसाम्याभ्युपगमे त्वनौपम्यतया संपूर्णमनोरथपुरुषार्थासम्भवात्।

शिवादाधिक्यवादस्तु संग्रहेण निरूप्यते।
व्यक्तिसाम्यमते प्रोक्तमङ्गीकृत्य यथोचितम् ॥ 813
पशुरेव शिवो यस्मात्पञ्चकृत्यकरः श्रुतः।
स इत्थं विग्रहोऽनेन करणेनाहतौजसा ॥ 814
करोति सर्वदा कृत्यं यदा यदुपपद्यते।
इति तत्कृत्यभेदेन लयावस्थादिसंभवः ॥ 815
तेनायं पाशसंबन्धः पशुरेव शिवः स्मृतः।
अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवे ॥ 816
इत्यादि वचनाक्तिश्च पशुराद्यः सदाशिवः।
एवं बूतात्सदाशिवादुत्कर्षेणैव वर्तते ॥ 817
सर्वबन्धविनिर्मुक्तो निष्कर्मा निरवस्थितः।
मुक्तो मुक्तावुपायस्तु व्यक्तिवादोक्तवर्त्मना ॥ 818
शिवोऽहं भावनाख्यः स्यात्स्वरूपध्यानगोचरः।
अन्यथा शिवधर्मस्य निकृष्टस्य तु भावना ॥ 819

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

कथं ददाति मुख्यत्वं मुक्तस्य परमात्मनः ।
न किञ्चिदपि कर्तव्यमिति हि श्रूयते श्रुतिः ।। 820
न च सृष्टयादि कुर्वन्ति स्वार्थनिष्ठा हि ते यतः ।
इति मुक्तस्य न तथा सर्वदाऽस्य महेशितुः ।। 821
तदेवमीशादाधिक्यमुक्तिरेव परा नृणाम् ।
शिवेन साम्यमुक्तिस्तु फल्गुप्राया निरस्यते ।। 822
नानौपम्यतया तत्र स्वसंपूर्णमनोरथः ।
पुरुषार्थः कुतः प्राप्तः परम इति निश्चयात् ।। 823
शैव भेदं प्रवक्ष्यामि ऐक्यपाषाणवादिनौ ।
भेदवादी समवादी संक्रान्तिश्चाविकारवान् ।। 824

34. काश्यपम्

संक्रान्त्या शिवसाम्यं तु तादात्म्यं काश्यपाशये ।
आत्मनः शिवसायुज्यं स्वसाध्यमविकारिणाम् ।। 825

इत्ययं किं प्रतिपादयति? शिवसंक्रान्ताविकारवादौ दर्शयति । अत्र काश्यपाभिमते संक्रान्तिसमतापक्षे तत्साम्यं तादात्म्यमेवेति प्रतिपादनं तदितराभिव्यक्ति उत्पत्त्यभ्युपगमे त्वनेकेश्वरवादादिदोषसंभवात् ।

शैवे संक्रान्तपक्षोऽयं काश्यपाभिमतः श्रुतः ।
कौशिकः काश्यपः चैव भारद्वाजश्च गौतमः ।। 826
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
कामिकादि सहस्रान्तमीशानं ..... था ।। 827
काश्यपं ब्रह्मर्षिप्रोक्तमूर्ध्ववक्त्रेण दीक्षितम् ।
संक्रान्तिशैवं काश्यपमित्येवं रौरवागमे ।। 828
इत्येवं तत्र संक्रान्तिसाम्यमुक्तौ तु युक्तिमत् ।
अनेकेश्वरवादादि दोष एव न संभवेत् ।। 829
अथ संक्रान्तपक्षोऽयं कथ्यते लेशतोऽधुना ।
प्रागुक्तसमवादार्थमङ्गीकृत्य यथोचितम् ।।
चेतनः पतिरेवान्यौ पशुपाशौ जडात्मकौ ।। 830

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पाशवत्तत्पशुश्चात्र जड एवेति विश्रुतः ।
अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽप्रभुः ।। 831
इति स्वायम्भुवाद् युक्तमात्मधर्मनिरूपणे ।
तदेवं सिद्धजीवात्मा निर्विकारी तथापि सः ।। 832
शरीरे दीपवद्भाति सर्वदा स्वप्रकाशतः ।
कान्तस्य सन्निधौ यद्वदयश्चेष्टा प्रदृश्यते ।। 833
सन्निधौ तस्य जीवस्य योगसिद्धिश्च जायते ।
तत्तत्कर्मानुसारेण बुद्धौ तत्प्रतिबिम्बतः ।। 834
प्राणव्यापारतो जातदेहचेष्टादिना पुनः ।
अजातप्राणवृत्त्या तु न तथा जडकालतः ।। 835
एवं संसारिणस्तस्य शक्तिपातादिसम्भवे ।
प्राणायामाभ्युपायेन परयोगानुसारतः ।। 836
सदाचार्योपदेशेन समाधिश्च विलीयते ।
श्यामनीलादिसम्बन्धात्स्फटिकत्वं मणौ स्थितम् ।। 837
त्यक्त्वा तानि प्रयत्नेन शुद्धस्फटिकमावहेत् ।
इत्येवं सुप्रभेदेऽथ निश्वासाख्ये तथा पुनः ।। 838
स च योगेन दृश्येत प्रत्यक्षं जलचन्द्रवत् ।
अमायी निर्विकारी च बहिरन्तश्च संस्थितः ।। 839
स मायी बिम्बसंक्रान्तः खे स्थितेन कृतो जले ।
मलिनेऽपि स्वदेहेऽपि दृश्यते परमेश्वरः ।। 840
जलसंपुर्णमध्ये तु छायारूपं यथा विशेत् ।
नोत्सरेन्नैव भिद्येत तद्वद् देवो विराजते ।। 841
काष्ठमध्ये स्थितो यद्वन्मथितो निर्मलोऽनलः ।। 842A
स च शान्तमये प्राप्ते न भूयो विशतेऽरणिम् ।
सम्यक् ज्ञानं विदित्वा तु पशुवन्न भवेत्पुनः ।। 843
न पशोः करणं चैव शिवस्यैव तथा वचः ।
शिवेनैक्यं गतः सिद्धस्तदधीनस्ववृत्तिकः ।। 844
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ।
एवं तत्करणत्वेन शिवभूतस्य योगिनः ।। 845

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विषयासक्तियोगेऽपि नागाम्यमिति च श्रुतम् ।
पद्मपत्रं यथा तोयैस्तत्स्थैरपि न लिप्यते । 846
शब्दादिविषयाम्भोभिर्युक्तो ज्ञानी न लिप्यते ।। 847A
तदेवं परमुक्तौ च तत्रैव वचनं श्रुतम् ।
अथात्मा तु शिवे लीनो जले तु लवणं यथा ।। 848
अविशेषं भजेन्मुक्तौ आत्मा तु परमात्मनि ।
शिवसमानतारूपं शिवविग्रहमेव च ।। 849
सकले निष्कले चैव सर्वत्रैव समानता ।
सायुज्यमिति तत्प्रोक्तमिति तादात्मयमेव तत् ।। 850
इत्येवं शिवसंक्रान्तपक्षो लेशान्निरूपितः । 851A

35. ईश्वर अविकारवादम्

शिवाविकारमार्गोऽयं कथ्यते लेशतोऽधुना ।
शिवसंक्रान्तसाम्योक्तमङ्गीकृत्य यथोचितम् ।। 852
शिव एव जगत्कर्ता तद्वदात्मा च चेतनः ।
पाश एव जडः प्रोक्तः पदार्थत्रयलक्षणम् ।। 853
अज्ञो जन्तुरनीशोऽयमित्यादि वचनात्क्वचित् ।
आत्मना मन्त्रतोक्तिस्तु न स्वभावात्समीरिता ।। 854
पाशेनात्यन्तसंश्लेषात्पाशधर्मानुसारिणी ।
तथा जीवो बहुच्छिद्रघटे दीप इव स्थितः ।। 855
देहेऽस्मिन् कर्मभोगार्थं स्वयमेव प्रवर्तते ।। 856
शिवसन्निधिमात्रेण सहायेन तथागमः ।
यस्य सन्निधिमात्रेण चेष्टन्ते सर्वजन्तवः ।। 857
इत्येवं निजसामर्थ्यान्नियतार्थसमीहितैः ।
इन्द्रियैर्जायते सर्वं तथैव श्रूयते वचः ।। 858
कलोद्बलितचैतन्यो विद्यादर्शितगोचरः ।
रागेण रञ्जितश्चापि बुद्ध्यादिकरणैर्युतः ।। 859
मायाद्यवनिपर्यन्तं तत्वभूतात्मवर्त्मनि ।
भुङ्क्ते तत्र स्थितान्भोगान्भोगैकरसिकः पुमान् ।। 860

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अक्षाण्यात्मप्रभुप्रेर्याण्यपि तन्न विदुः स्वयम्।
तैर्विना यन्न वेत्यर्थं न विना तेन तान्यपि ॥ 861
एवं संसारिणस्तस्य शक्तिपातादिसम्भवे।
ज्ञानाद्युपायतो मुक्तौ प्रयत्नं च विधीयते ॥ 862
उत्साहान्निश्चयाद्धैर्यादभ्यासात्तत्त्वदर्शनात्।
मुनेर्जनपदत्यागाद्योगः षड्भिः प्रसिध्यति ॥ 863
उल्काहस्तो यथा कश्चित् द्रव्यमालोक्य तां त्यजेत्।
ज्ञानेन ज्ञेयमालोक्य पश्चाज्ज्ञानं परित्यजेत् ॥ 864
इत्याद्युपायसंपन्नः स्वसामर्थ्यविशेषतः।
पशुभावपरित्यागाद्व्रजत्येकान्ततः शिवम् ॥ 865
पुरुषो धर्मसन्तप्तः स्वचछायापरिशोभितम्।
वृक्षं स्वच्छं जलं वापि यथा तद्वदिहागमः ॥ 866
चिद्दृशात्मनि दृष्ट्वेशं त्यक्त्वा वृत्तिमरीचिकाम्।
लब्ध्वा शिवपदच्छायां ध्यायेत्पञ्चाक्षरं सुधीः ॥ 867
नैव शून्यं न चाशून्यं अशून्यं शून्यमेव च।
पक्षपातविनिर्मुक्तमात्मानं पर्युपासयेत् ॥ 868
जलं सामुद्रमासाद्य नदी हृष्टाम्बुवाहिनी।
क्षारतोयत्वमायाति प्रभावाद्धिमहोदधेः ॥ 869
एवं वै देहभिन्नात्मा शान्तिमेवाधिगच्छति।
एकान्तेऽवस्थितः सैष शिवशक्तिसमन्वितः ॥ 870
सर्वान्बन्धान्परित्यज्य मुक्तो व्रजति तं परम्।
इतीश्वराविकाराख्यपक्षः सोऽयं विनिश्चितः ॥ 871

36. परिणामवादम्

परिणाममते मुक्तिः स्करूपावाप्तिरिष्यते।
मकुटाजितवीरादिदक्षिणागमवर्त्मना ॥ 872

इत्ययं किं प्रतिपादयति? निमित्तकारणपरिणामवादं दर्शयति।
अथात्र उक्तकारणपरिणामवादे नृणां स्वरूपावाप्तिरेव मुक्तिरिति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्रतिपादनं तेषां शिवात्मकत्वेन तदितरेषां च तथात्वेनाभ्युपगम्य प्रगुक्ताविकारादिवादरीत्त्या शिवं विना पदार्थान्तराभ्युपगमात्।

37. शैवम्

अथात्र शैवपक्षार्थः संग्रहेण निगद्यते।
पूर्वतः प्रोक्तपक्षेष्वप्यङ्गीकृत्य यथोचितम्॥ 873
उक्तानां त्रिपदार्थानां अनन्यत्वं परस्परम्।
व्याप्तितस्तत्र जीवस्तु स्वप्रकाशचिदात्मकः॥ 874
अनादि मलबद्धोऽयमज्ञः केवलतः पुनः॥ 875A
कलादि ज्ञानसंप्राप्त्या दीपवत्परमेष्ठिना।
सुखदुःखादिकान्भोगान्भुङ्क्ते संसारकालतः॥ 876
एवं संसारिणस्तस्य शक्तिपातादिसम्भवे।
शिवोऽयं देशिको भूत्वा दीक्षापूर्वं यथामतम्॥ 877
मलमायादिबन्धानां मुक्त्युपायं वदत्यथ।
तद्विधोपायसंसिद्धौ ज्ञानं तज्जायते स्फुटम्॥ 878
तदेव तादृशज्ञातृज्ञानज्ञेयविहीनतः
तज्जीवपरयोरैक्य तादात्म्यमपि सिद्ध्यति॥ 879
न त्वत्रातिशयः कश्चिदानन्दानुभवः पुनः।
तथात्वे भेदवादः स्यात्तत एवं वचः श्रुतम्॥ 880
देहपाते शिवो भूत्वा शिवधर्मान्वितः स च।
न पुनर्भेदमायाति सरित्तोयमिवाम्बुधौ॥ 881
ज्ञातृज्ञानज्ञेयभेदविहीनं तत्परं पदम्।
प्राप्य लाभाच्च मुक्तोऽसौ किं पुनः प्राप्यमिष्यते॥ 882
इत्येवं संग्रहेणात्र शैवपक्षः समीरितः। 883A

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE